नाभिगन्तुं न च द्रष्टुं पुरस्तान्नोपसर्पितुम् ॥९९

शेकुस्त्रस्ताः सुराः सर्वे पद्मयोनिं महाप्रभुम् ।
अभिभूतमिवाऽऽत्मानं मन्यमाना हतत्विषः ॥१००

सर्वे ते मन्त्रयामासुर्देवता (वास्तु) हितमात्मनः ।
गच्छामः शरणं शम्भुं निस्तेजसोऽस्य तेजसा ॥१०१

× × ×

देवाः ऊचुः—

नमस्ते सर्वदेवेश महेश्वर नमो नमः ।
यज्ञयोने परं ब्रह्म भूतात्मंस्त्वं सनातन ॥१०२

× × ×

तत्सर्वं ब्रह्मणा ग्रस्तं पञ्चमास्यस्य तेजसा ।
विनेशुः सर्वतेजांसि त्वत्प्रसादात्पुनः प्रभो ॥१०६

जायन्ते तद्यथापूर्वं तथा कुरु महेश्वर ।
ततः प्रसन्नवदनो देवैश्चापि नमस्कृतः ॥१०७

Śiva goes to Brahmā :

अभिगम्य ततो रुद्रो ब्रह्माणं परमेश्वरम् ।
अहोऽतितेजसा वक्त्रमधिकं देव राजते ॥१११

एवमुक्त्वाऽट्टहासं तु मुमोच शशिशेखरः ।
वामाङ्गुष्ठनखाग्रेण ब्रह्मणः पञ्चमं शिरः ॥११२

चकर्त कदलीगर्भं नरः करुहैरिव ।
छिन्नं तु तच्छिरः पश्चाद्रुद्रहस्ते स्थितं तदा ॥११३

× × ×

Śiva cut down the head of Brahmā and as a result of it, the gods went to esctacy and eulogised him :

देवाः ऊचुः—

नमः कपालिने नित्यं महाकालाय शङ्किने ।
ऐश्वर्यज्ञानयुक्ताय सर्वभोगप्रदायिने ॥११६

× × ×

छित्वा ब्रह्मशिरो यस्मात्त्वं कपालं बिभर्षि च ।

तेन देव कपाली त्वं स्तुतो ह्यद्य प्रसीद नः ॥११९
एवं स्तुतः प्रसन्नात्मा देवान्प्रस्थाप्य शङ्करः ।

स्वानि धिष्ण्यानि भगवांस्तत्रैवाऽऽसीन्मुदाऽन्वितः ॥१२०
विज्ञाय ब्रह्मणो भावं ततो वीरस्य जन्म च ।

तं प्रवीरस्य वाक्यात्तु लोकानां लोपशान्तये ॥१२१

शिरस्यञ्जलिमाधाय संतुष्ठाव प्रणम्य तम् ।
तेजोनिधिं परं ब्रह्म ज्ञातुमिच्छन्प्रजापतिम् ॥१२२
निरुक्तसूत्ररहस्यैर्ऋग्यजुः सामभाषितैः ॥१२३

रुद्र उवाच—

अप्रमेय नमस्तेऽस्तु परस्य परमात्मने ।
अद्भुतानां प्रसूतिस्त्वं तेजसां निधिरक्षयः ॥१२४
विजयाद्विश्वभावस्त्वं सृष्टिकर्त्ता प्रजापते ।
ऊर्ध्ववक्त्र नमस्तेऽस्तु सत्त्वात्मक वरात्मक ॥१२५
जलस्थायिञ्जलोत्पन्न जलालय नमोऽस्तुते ।
जलजोत्फुल्लपत्राक्ष जय देव पितामह ॥१२३
त्वया चोत्पादितं पू (स) र्वं सृष्टचर्थं परमेश्वर ।
यज्ञाहुतिसदाहार यज्ञाङ्गेश नमोऽस्तु ते ॥१२७
स्वर्णगर्भ पद्मगर्भ देवगर्भ प्रजापते ।
त्वं यज्ञस्त्वं वषट्कारः स्वधा त्वं पद्मसम्भव ॥१२८
वचनेन तु देवानां शिरश्छिन्नं मया प्रभो ।
ब्रह्महत्याभिभूतोऽस्मि मां त्राहि त्वं जगत्पते ॥
इत्युक्तो देवदेन ब्रह्मा वचनमब्रवीत् ॥१२६

ब्रह्मोवाच—

सखा नारायणो देवः स त्वां पूतं करिष्यति ।
कीर्तनीयस्त्वया मान्यः स मे पूज्यो विभुः स्वयम् ॥१३०
अनुध्यातोऽसि वै नूनं तेन देवेन विष्णुना ।
येन ते मतिरुत्पन्ना स्तोतुं मां भक्तिरुत्थिता ॥१३१
शिरश्छेदात्कपाली त्वं सोमसिद्धान्तकारकः ।
उद्धर्ता त्वं हि जन्तूनां सूरिशासनकारकः ॥१३२
कोटचाः शतं तु विप्राणामुद्धर्ताऽसि महाद्युते ।
व्रतं त्वं [तु] ब्रह्महत्याया नान्यत्किंचन विद्यते ॥१३३
अमाष्याः पापिनः क्रूरा ब्रह्मघ्नाः पापकारिणः ।
बैडालिका विकर्मस्था न ते पूज्याः कथंचन ॥१३४
तैश्च दृष्टैः सदा कार्यं भास्करस्यावलोकनम् ।
अङ्गस्पर्शे कृते रुद्र सचैलो जलमाविशेत् ॥१३५

एवं शुद्धिमवाप्नोति पूर्वं दृष्टं मनीषिभिः ।
स भवान् ब्रह्महन्ताऽसि शुद्ध्यर्थं व्रतमाचर ॥१३६

चीर्णे व्रते पुनर्भूयः प्राप्स्यसे त्वं वरान्बहून् ।
एवमुक्त्वा गतो ब्रह्मा रुद्रस्तं नाभिजज्ञिवान् ॥१३७

अचिन्तयत्तदा विष्णुं ध्यानगत्या गतः स्वयम् ।
लक्ष्मीसहायं वरदं देवदेवं सनातनम् ॥१३८

अष्टाङ्गप्रणिपातेन नत्वा देवं त्रिलोचनः ।
तुष्टाव प्रणतो भूत्वा शङ्खचक्रगदाधरम् ॥१३९

× × ×

विष्णुरुवाच—

ब्रह्मवध्या परा चोग्रा सर्वकष्टप्रदा परा ।
मनसाऽपि न कुर्वीत पापस्यास्य तु भावनाम् ॥१६१
भवता देववाक्येन निष्ठा चैषा निवेदिता ।
इदानीं त्वं महाबाहो ब्रह्मणोक्तं समाचर ॥१६२

× × ×

लक्ष्मीसहायो गतवान्रुद्रस्तं नाभिजज्ञिवान् ।
कपालपाणिर्देवेशः पर्यटन्वसुधामिमाम् ॥१६५

× × ×

तदाऽस्य बुद्धिरुत्पन्ना व्रतं चैतत्करोम्यहम् ।
मदीयेनैव मार्गेण द्विजा यास्यन्ति सर्वशः ॥१७१

ध्यात्वैवं सुचिरं देवो वसुधां विचचार ह ।
पुष्करं तु समासाद्य प्रविष्टोऽरण्यमुत्तमम् ॥१७२

× × ×

अत्राऽऽराधयतो भक्त्या ब्रह्मा दास्यति वै वरम् ।
ब्रह्मप्रसादात्संप्राप्तं पौष्करं ज्ञानमीप्सितम् ॥१७६

पापघ्नं दुष्टशमनं पुष्टिश्रीबलवर्धनम् ।
तस्मात्सर्वप्रयत्नेन ये प्रपन्ना महेश्वरम् ॥१७७

अपवर्गो भवेत्तेषां स्वर्गो वा प्रीतिदः स्मृतः ।
एवं वै ध्यायतस्तस्य रुद्रस्यामिततेजसः ।।१७८

आजगाम ततो ब्रह्मा भक्तिप्रीतोऽथ पद्मजः ।
उवाच प्रणतं रुद्रमुत्थाप्य च पुनर्गुरुः ।।१७९

दिव्यव्रतोपचारेण सोऽहमाराधितस्त्वया ।
भवता श्रद्धयाऽत्यर्थं मम दर्शनकाङ्क्षया ।।१८०

व्रतस्था मां हि पश्यन्ति मानुषा देवतास्तथा ।
तदिच्छया प्रयच्छामि वरं यत्प्रवरं वरम् ।।१८१

सर्वकामसमृद्धयर्थं व्रतं यस्मान्निषेवितम् ।
मनोवाक्कायभावैश्च संतुष्टेनान्तरात्मना ।।
कञ्चिद्ददद्मि च वै कामं वद भो मे यथेप्सितम् ।।१८२

रुद्र उवाच—

एष एवाद्य भगवन्सुपर्याप्तो मया वरः ।
यद्दृष्टोऽसि जगद्वन्द्य जगत्कर्तर्नमोऽस्तु ते ।।१८३

महता यज्ञसाध्येन बहुकालार्जितेन च ।
प्राणव्ययकरेण त्वं तपसा देव दृश्यसे ।।१८४

इदं कपालं देवेश न करात्पतते विभो ।
त्रपाकरा ऋषीणां च चर्यैषा कुत्सिता विभो ।।१८५

त्वत्प्रसादाद्व्रतं चेदं कृतं कापालिकं च यत् ।
सिद्धमेतत्प्रपन्नस्य महाव्रतमिहोच्यताम् ।।१८६

पुण्यप्रदेशे यस्मिंश्च क्षिपाम्येतद्वदस्व मे ।
पूतो भवामि येनाहं मुनीनां भावितात्मनाम् ।।१८७

लभामि देवशब्दत्वं प्रणमन्ति व्रतार्थिनः ।।१८८

ब्रह्मोवाच—

अविमुक्तं भगवतः स्थानं चास्ति पुरातनम् ।
कपालमोचनं तीर्थं तव तत्र भविष्यति ।।१८९

अहं च त्वं स्थितस्तत्र विष्णुश्चापि भविष्यति ।
दर्शने भवतस्तत्र महापातकिनोऽपि ये ॥१६०
तेऽपि भोगान्समश्नन्ति विशुद्धा भवने मम ।
वरुणा च असी चापि द्वे नद्यौ सुरवल्लभे ॥१६१
अन्तरालं तयोः क्षेत्रे (त्रं) मध्ये न विशते क्वचित् ।
तीर्थानां प्रवरं तीर्थं क्षेत्राणां प्रवरं तव ॥१६२
आ देहपतनाद्ये तु क्षेत्रं सेवन्ति मानवाः ।
ते मृता हंसयानेन स्वर्गं यान्त्यकुतोभयाः ॥१६३
पञ्चक्रोशप्रमाणेन क्षेत्रं दत्तं मया तव ।
क्षेत्रमध्याद्यदा गङ्गा गमिष्यति सरिद्वरा ॥१६४
तेन सा महती पुण्या पुरी रुद्र भविष्यति ।
पुण्या चोदङ्मुखी गङ्गा यत्र प्राची सरस्वती ॥१६५
उदङ्मुखी योजने द्वे गच्छन्ती जाह्नवी नदी ।
तत्र ते विबुधाः सर्वे मया मह सवासवाः ॥१६६
तत्र ते वासमेष्यन्ति कपालं तत्र मोचय ।
तस्मिस्तीर्थे तु वै गत्वा पिण्डदानेन ये पितॄन् ॥१६७
श्राद्धैस्तु प्रीणयिष्यन्ति तेषां लोकोऽक्षयो दिवि ।
वाराणस्यां महातीर्थे नरः स्नातो विमुच्यते ॥१६८

× × ×

अध्याय ३५

Rama eulogises Brahmā at the Puṣkaratīrtha :

श्रीराम उवाच—

नमामि लोककर्तारं प्रजापतिसुरार्चितम् ।
देवनाथं लोकनाथं प्रजानाथं जगत्पतिम् ॥१६३
नमस्ते देवदेवेशं सुरासुरनमस्कृत ।
भूतभव्यभवन्नाथ हर पिङ्गललोचन ॥१६४

बालस्त्वं वृद्धरूपी च नीलग्रीव महोदर ।
तारणश्चासि देवस्त्वं [त्रैलोक्यप्रभुरीश्वरः ॥१६५
हिरण्यगर्भ पद्मगर्भ वेदगर्भ स्मृतिप्रिय] ।
[महासिश्च महापद्मी महादण्डी च मेखली ॥१६६
कालश्च कालरूपी च नीलग्रीवो विदां वरः ।
वेदकर्त्ताऽर्भको नित्यः पशूनां पतिरव्ययः ॥१६७
दर्भपाणिर्हंसकेतुर्भोक्ता गोप्ता हरो हरिः ।
जटी मुण्डी शिखी दण्डी लगुडी महायशाः ॥१६८
भूतेश्वरः सुराध्यक्षः सर्वात्मा सर्वभावनः ।
सर्वगः सर्वहारी च स्रष्टा च गुरुरव्ययः ॥१६९
कमण्डलुधरो देवः स्रुक्स्रुवादिधरस्तथा ।
[हवनीयोऽर्चनीयश्च ओंकारो ज्येष्ठसामगः] ॥१७०
मृत्युश्चैवामृतश्चैव पारियात्रश्च सुव्रतः ।
ब्रह्मचारी व्रतधरो गुहावासी सुपङ्कजः ॥१७१
अमरो दर्शनीयश्च बालसूर्यनिभस्तथा ।
पद्मवासी च भगवान्सावित्रीपतिरच्युतः ॥१७२
वरप्रदो दानवानां विष्णोर्लब्धवरस्तथा ।
कर्मकर्त्ताऽधर्महर्ता अभयहस्त एव च ॥१७३
अग्निमुखो ह्यग्निकेतुर्मुनिरूपो दिशां पतिः ।
उत्सवो वेदस्रष्टाऽसि चतुर्वर्गाधिपस्तथा ॥१७४
[दक्षिणे वामतश्चापि पत्नीभ्यामुपसेवितः ।
भिक्षुश्च भिक्षुरूपी च त्रिजटी जटिलश्च यः ॥१७५
चित्तवृत्तिकरः कामो मधुर्मधुकरस्तथा ।]
वानप्रस्थो वनगत आश्रमैः पूजितस्तथा ॥१७६
जगद्धाता च कर्ता च पुरुषः शाश्वतो ध्रुवः ।
धर्माध्यक्षो विरूपाक्षो नृवर्त्मा भूतभावनः ॥१७७
त्रिवेदो बहुरूपश्च सूर्यायुतसमप्रभः ।
मोहको बन्धकश्चैव दानवानां विशेषतः ॥१७८

देवदेवोऽतिदेवश्च पद्माङ्कितजटस्तथा ।
हरिच्छ्मश्रुर्धनुर्धारी भीमो धर्मपराक्रमः ॥१७६

एवं स्तुतस्तु रामेण ब्रह्मा ब्रह्मविदां वरः ।
उवाच प्रणतं रामं करे गृह्य पितामहः ॥१८०

ब्रह्मोवाच—

विष्णुस्त्वं मानुषे देहे मया पूर्वं प्रवेशितः ।
देवानां कार्यकरणे अवतीर्णो महीतले ॥१८१

कृतं तद्भवता सर्वं देवकार्यं त्वया विभो ।
इमं तु वामनं स्थाप्य जाह्नव्या दक्षिणे तटे ॥१८२

अयोध्यां स्वपुरीं गत्वा सुरलोकं व्रजस्व ह ।
विसृष्टो ब्रह्मणा रामः प्रणिपत्य पितामहम् १८३
आरूढः पुष्पकं यानं प्रायाद्वै मथुरां पुरीम् ।
सभार्यं पुत्रसहितं शत्रुघ्नं शत्रुकर्षणम् ॥१८४

× × ×

प्रेषयित्वा तु किष्किन्धां सुग्रीवं वानरेश्वरम् ।
अयोध्यामागतो रामः पुष्पकं तमथाब्रवीत् ॥१६७

२. ब्रह्मवैवर्तपुराणम् (ब्र० ख०)

आविर्बभूव तत्पश्चात्कृष्णस्य नाभिपङ्कजात् ।
महातपस्वी वृद्धश्च कमण्डलुकरो वरः ॥१।३।३०॥

शुक्लवासाः शुक्लदन्तः शुक्लकेशश्चतुर्मुखः ।
योगीशः शिल्पिनामीशः सर्वेषां जनको गुरुः १।३।३१॥

तपसां फलदाता च प्रदाता सर्वसंपदाम् ।
स्रष्टा विधाता कर्त्ता च हर्ता च सर्वकर्मणाम् ॥१।३।३२॥

धाता चतुर्णां वेदानां त्राता वेदप्रसूतिः ।
शान्तः सरस्वतीकान्तः सुशीलश्च कृपानिधिः ॥१।३।३३॥

श्रीकृष्णपुरतः स्थित्वा तुष्ठाव तं पुटञ्जलिः ।
पुलकाङ्कितसर्वाङ्गो भक्तिनम्रात्मकंधरः ॥१।३।३४॥

ब्रह्मोवाच—

कृष्णं वन्दे गुणातीतं गोविन्दमेकमक्षरम् ।
अव्यक्तमव्ययं व्यक्तं गोपवेषविधायिनम् ॥१।३।३५॥

किशोरवयसं शान्तं गोपीकान्तं मनोहरम् ।
नवीननीरदश्यामं कोटिकन्दर्पसुन्दरम् ॥१।३।३६॥

× × ×

इति ब्रह्मकृतं स्तोत्रं प्रातरुत्थाय यः पठेत् ।
पापानि तस्य नश्यन्ति दुःस्वप्नः सुस्वप्नो भवेत् ॥१।३।३६॥

भक्तिर्भवति गोविन्दे श्रीपुत्रपौत्रवर्धिनी ।
अकीर्तिः क्षयमाप्नोति सत्कीर्तिर्वर्धते चिरम् ॥१।३।४०॥

× × ×

रतिं दृष्ट्वा ब्रह्मणश्च रेतः पातो बभूव ह ।
तत्र तस्थौ महायोगी वस्त्रेणाऽऽच्छाद्य लज्जया ॥१।४।१३॥

वस्त्रं दग्ध्वा समुत्तस्थौ ज्वदग्निः सुरेश्वरः ।
कोटितालमाणश्च सशिखश्च समुज्ज्वलन् ॥१।४।१४॥

कृष्णस्तद्वर्धनं दृष्ट्वा ससर्जापः स्वलीलया ।
निःश्वासवायुना सार्धं मुखविन्दून्समुद्गिरन् ॥१।४।१५॥

विश्वौघं प्लावयामास मुखविन्दुजलं द्विज ।
तत्र किंचिज्जलकणं (णो) वह्निं शान्तं चकार ह ॥१।४।१६॥

ततः प्रभृति तेनाग्निस्तोयान्निर्वाणतां व्रजेत् ।
आविर्भूतः पुमानेकस्ततस्तदधिदेवता ॥१।४।१७॥

उत्तस्थौ तज्जलादेकः पुमान्स वरुणः स्मृतः ।
जलाधिष्ठातृदेवोऽसौ सर्वेषां यादसां पतिः ॥१।४।१८॥

आविर्बभूव कन्यैका तद्वह्नेर्वामपार्श्वतः ।
सा स्वाहा वह्निपत्नीं तां प्रवदन्ति मनीषिणः ॥१।४।१६॥

जलेशस्य वामपार्श्वात्कन्या चैका बभूव सा ।
वरुणानीति विख्याता वरुणस्य प्रिया सती ॥१।४।२०॥

बभूव पवनः श्रीमान्विभोर्निःश्वासवायुना ।
स च प्राणश्च सर्वेषां निःश्वासस्तत्कलोद्भवः ॥१।४।२१॥

तस्य वायोर्वाम गार्श्वात्कन्या चैका बभूव ह ।
वायोः पत्नी च सा देवी वायवी परिकीर्तिता ॥१।४।२२॥

× × ×

तदा ब्रह्मा तपः कृत्वा सिद्धिं प्राप्य यथेप्सिताम् ।
ससृजे पृथिवीमादौ मधुकैटभमेदसा ॥१।७।१॥

ससृजे पर्वतानष्टौ प्रधानान्सुमनोहरान् ।
क्षुद्रानसंख्यान्कि ब्रूमः प्रधानाख्यां निशामय ॥१।७।२॥

सुमेरुं चैव कैलासं मलयं च हिमालयम् ।
उदयं च तथाऽस्तं च सुवेलं गन्धमादनम् ॥१।७।३॥

समुद्रान्ससृजे सप्त नदान्कतिविधा नदीः ।
वृक्षांश्च ग्रामनगरं समुद्राख्या निशामय ॥१।७।४॥

लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवान् ।
लक्षयोजनमानेन द्विगुणांश्च परात्परान् ॥१।७।५॥

सप्तदीपांश्च तद्भूमिमण्डले कमलाकृते ।
उपदीपांस्तथा सप्त सीमाशैलांश्च सप्त च ॥१।७।६॥

निबोध विप्र द्वीपाख्यां पुरा या विधिना कृता ।
जम्बूशाककुशप्लक्षक्रौञ्चन्यग्रोधपौष्करान् ॥१।७।७॥

मेरोरष्टसु शृङ्गेषु ससृजेऽष्टौ पुरीः प्रभुः ।
अष्टानां लोकपालानां विहाराय मनोहराः ॥१।७।८॥

मूलेऽनन्तस्य नगरीं निर्माय जगतां पतिः ।
ऊर्ध्वे स्वर्गांश्च सप्तैव तेषामाख्यां निशामय ॥१।७।९॥

भूर्लोकं च भुवर्लोकं स्वर्लोकं मनोहरम् ।
जनोलोकं तपोलोकं सत्यलोकं च शौनक ॥१।७।१०॥

शृङ्गमूर्ध्नि ब्रह्मलोकं जरादिपरिवर्जितम् ।
तदूर्ध्वे ध्रुवलोकं च सर्वतः सुमनोहरम् ॥१।७।११॥

तदधः सप्त पातालान्निर्ममे जगदीश्वरः ।
स्वर्गातिरिक्तभोगाढ्यानधोऽधः क्रमतो मुने ॥१।७।१२॥

अतलं वितलं चैव सुतलं च तलातलम् ।
महातलं च पातालं रसातलमधस्ततः ॥१।७।१३॥

सप्तद्वीपैः सप्तनाकैः सप्तपातालसंज्ञकैः ।
एभिर्लोकैश्च ब्रह्माण्डं ब्रह्माधिकृतमेव च ॥१।७।१४॥

एवं चासंख्यब्रह्माण्डं सर्वं कृत्रिममेव च ।
महाविष्णोश्च लोम्नां च विवरेषु च शौनक ॥१।७।१५॥

प्रतिविश्वेषु दिक्पाला ब्रह्मविष्णुमहेश्वराः ।
सुरा नरादयः सर्वे सन्ति कृष्णस्य मायया ॥१।७।१६॥

ब्रह्माण्डगणनां कर्त्तुं न क्षमो जगतां पतिः ।
न शङ्करो न धर्मश्च न च विष्णुश्च के सुराः ॥१।७।१७॥

संख्यातुमीश्वरः शक्तो न संख्यातुं तथाऽपि सः ।
विश्वाकाशदिशां चैव सर्वतो यद्यपि क्षमः ॥१।७।१८॥

कृत्रिमाणि च विश्वानि विश्वस्थानि च यानि च ।
अनित्यानि च विप्रेन्द्र स्वप्नवन्नश्वराणि च ॥१।७।१९॥

वैकुण्ठः शिवलोकश्च गोलोकश्च तयोः परः ।
नित्यो विश्वबहिर्भूतश्चाऽऽत्माकाशदिशो यथा ॥१।७।२०॥

———

ब्रह्मा विश्वं विनिर्माय सावित्र्यां वरयोषिति ।
चकार वीर्याधानं च कामुक्यां कामुको यथा ॥१।८।१॥

सा दिव्यं शतवर्षं च धृत्वा गर्भं सुदुःसहम् ।
सुप्रसूता च सुषुवे चतुर्वेदान्मनोहरान् ॥१।८।२॥

विविधाञ्शास्त्रसंघांश्च तर्कव्याकरणादिकान् ।
षट्त्रिंशत्संख्यका दिव्या रागिणीः सुमनोहराः ॥१।८।३॥

षड् रागान्सुन्दरांश्चैव नानातालसमन्वितान् ।
सत्यत्रेताद्वापरांश्च कलिं च कलहप्रियम् ॥१।८।४॥

वर्षं मासमृतुं चैव तिथिं दण्डक्षणादिकम् ।
दिनं रात्रिं च वारांश्च संध्यामुषसमेव च ॥१।८।५॥

पुष्टिं च देवसेनां च मेधां च विजयां जयाम् ।
षट् कृत्तिकाश्च योगांश्च करणं च तपोधन ॥१।८।६॥

देवसेनां महाषष्टीं कार्तिकेयप्रियां सतीम् ।
मातृकासु प्रधाना सा बालानामिष्टदेवता ॥१।८।७॥

ब्राह्मं पाद्मं च वाराहं कल्पत्रयमिदं स्मृतम् ।
नित्यं नैमित्तिकं चैव द्विपरार्धं च प्राकृतम् ॥१।८।८॥

चतुर्विधं च प्रलयं कालं वै मृत्युकन्यकाम् ।
सर्वान्व्याधिगणांश्चैव सा प्रसूय स्तनं ददौ ॥१।८।६॥

अथ धातुः पृष्ठदेशादधर्मः समजायत ।
अलक्ष्मीस्तद्वामपार्श्वाद्बभूवात्यन्तकामिनी ॥१।८।१०॥

नाभिदेशाद्विश्वकर्मा जातो वै शिल्पिनां गुरुः ।
महान्तो वसवोऽष्टौ च महाबलपराक्रमाः ॥१।८।११॥

अथ धातुः मनस आविर्भूताः कुमारकाः ।
चत्वारः पञ्चवर्षीया ज्वलन्तो ब्रह्मतेजसा ॥१।८।१२॥

सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
सनत्कुमारो भगवांश्चतुर्थो ज्ञानिनां वरः ॥१।८।१३॥

आविर्बभूव मुखतः कुमारः कनकप्रभः ।
दिव्यरूपधरः श्रीमान्सस्त्रीकः सुन्दरो युवा ॥१।८।१४॥

क्षत्रियाणां बीजरूपो नाम्ना स्वायंभुवो मनुः ।
या स्त्री सा शतरूपा च रूपाढ्या कमलाकला ॥१।८।१५॥

सस्त्रीकश्च मनुस्तस्थौ धात्राज्ञापरिपालकः ।
स्वयं विधाता पुत्रांश्च तानुवाच प्रहर्षितान् ॥१।८।१६॥

सृष्टिं कर्त्तुं महाभागो महाभागवतान्द्विजः ।
जग्मुस्ते च नहीत्युक्त्वा तप्तुं कृष्णपरायणः ॥१।८।१७॥

चुकोप हेतुना तेन विधाता जगतां पतिः ।
कोपासक्तस्य च विधेर्ज्वलतो ब्रह्मतेजसा ॥१।८।१८॥

आविर्भूता ललाटाच्च रुद्रा एकादश प्रभोः ।
कालाग्निरुद्रः संहर्त्ता तेषामेकः प्रकीर्त्तितः ॥१।८।१६॥

सर्वेषामेव विश्वानां स तामस इति स्मृतः ।
राजसश्च स्वयं ब्रह्मा शिवो विष्णुश्च सात्त्विकौ ॥१।८।२०॥

गोलोकनाथः कृष्णश्च निर्गुणः प्रकृतेः परः ।
परमज्ञानिनो मूर्खा वदन्ति तामसं शिवम् ॥१।८।२१॥

शुद्धसत्त्वस्वरूपं च निर्मलं वैष्णवाग्रणीम् ।
शृणु नामानि रुद्राणां वेदोक्तानि च यानि च ॥१।८।२२॥

महान्महात्मा मतिमान्भीषणश्च भयंकरः ।
ऋतुध्वजश्चोर्ध्वकेशः पिङ्गलाक्षो रुचिः शुचिः ॥१।८।२३॥

पुलस्त्यो दक्षकर्णाच्च पुलहो वामकर्णतः ।
दक्षनेत्रात्तथाऽत्रिश्च वामनेत्रात्क्रतुः स्वयम् ॥१।८।२४॥

अरणिर्नासिकारन्ध्रादङ्गिराश्च मुखाद्रुचिः ।
भृगुश्च वामपार्श्वाच्च दक्षो दक्षिणपार्श्वतः ॥१।८।२५॥

छायायाः कर्दमो जातो नाभेः पञ्चशिखस्तथा ।
वक्षसश्चैव वोढुश्च कण्ठदेशाच्च नारदः ॥१।८।२६॥

मरीचिः स्कन्धदेशाच्चैवापान्तरतमा गलात् ।
वसिष्ठो रसनादेशात्प्रचेता अधरोष्ठतः ॥१८।२७॥

हंसश्च वामकुक्षेश्च दक्षकुक्षेर्यतिः स्वयम् ।
सृष्टिं विधातुं स विधिश्चकाराऽऽज्ञां सुतान्प्रति ॥
पितुर्वाक्यं समाकर्ण्य तमुवाच स नारदः ॥१।८।२८॥

नारद उवाच—

पूर्वमानय मज्ज्येष्ठान्सनकादीन्पितामह ।
कारयित्वा दारयुक्तानस्मान्वद जगत्पते ॥१।८।२९॥

पित्रा ते तपसे युक्ताः संसाराय वयं कथम् ।
अहो हन्त प्रभोर्बुद्धिर्विपरीताय कल्पते ॥१।८।३०॥

कस्मै पुत्राय पीयूषात्परं दत्तं तपोऽधुना ।
कस्मै ददासि विषयं विषमं च विषाधिकम् ।१।८।३१॥

अतीव निम्ने घोरे च भवाब्धौ यः पतेत्पितः ।
निष्कृतिस्तस्य नास्तीति कोटिकल्पे गतेऽपि च ॥१।८।३२॥

निस्तारबीजं सर्वेषां बीजं च पुरुषोत्तमम् ।
सर्वदं भक्तिदं दास्यप्रदं सत्यं कृपामयम् ॥१।८।३३॥

भक्तैकशरणं भक्तवत्सलं स्वच्छमेव च ।
भक्तप्रियं भक्तनाथं भक्तानुग्रहकारकम् ॥१।८।३४॥

भक्ताराध्यं भक्तसाध्यं विहाय परमेश्वरम् ।
मनो दधाति को मूढो विषये नाशकारणे ॥१।८।३५॥

विहाय कृष्णसेवां च पीयूषादधिकां प्रियाम् ।
को मूढो विषमश्नाति विषमं विषयाभिधम् ॥१।८।३६॥

स्वप्नवन्नश्वरं तुच्छमसत्यं मृत्युकारणम् ।
यथा दीपशिखाग्रं च कीटानां सुमनोहरम् ॥१।८।३७॥

यथा बडिशमांसं च मत्स्यापातसुखप्रदम् ।
तथा विषयिणां तात विषयो मृत्युकारणम् ॥१।८।३८॥

इत्युक्त्वा नारदस्तत्र विरराम विधेः पुरः ।
तस्थौ तातं नमस्कृत्य ज्वलदग्निशिखोपमः ॥१।८।३९॥

ब्रह्मा कोपपरीतश्च शशाप तनयं द्विज ।
उवाच कम्पिताङ्गश्च रक्तास्यः स्फुरिताधरः ॥१।८।४०॥

ब्रह्मोवाच—

भविता ज्ञानलोपस्ते मच्छापेन च नारद ।
क्रीडामृगश्च त्वं साध्यो योषिल्लुब्धश्च लम्पटः ॥१।८।४१॥

स्थिरयौवनयुक्तानां रूपाढ्यानां मनोहरः ।
पञ्चाशत्कामिनीनां च भर्ता च प्राणवल्लभः ॥१।८।४२॥

शृङ्गारशास्त्रवेत्ता च महाशृङ्गारलोलुपः ।
नानाप्रकारशृङ्गारनिपुणानां गुरोर्गुरुः ॥१।८।४३॥

गन्धर्वाणां च सुवरः सुस्वरश्च सुगायनः ।
वीणावादनसन्दर्भनिष्णातः स्थिरयौवनः ॥१।८।४४॥

प्राज्ञो मधुरवाक्शान्तः सुशीलः सुन्दरः सुधीः ।
भविष्यसि न संदेहो नामतश्चोपबर्हणः ॥१।८।४५॥

ताभिर्दिव्यं लक्षयुगं विहृत्य निर्जने वने ।
पुनर्मदीयशापेन दासीपुत्रश्च तत्परः ॥१।८।४६॥

वत्स वैष्णवसंसर्गाद्वैष्णवोच्छिष्टभोजनात् ।
पुनः कृष्णप्रसादेन भविष्यसि ममाऽऽत्मजः ॥१।८।४७॥

ज्ञानं दास्यामि ते दिव्यं पुनरेव पुरातनम् ।
अधुना तव नष्टस्त्वं मत्सुतो निपत ध्रुवम् ॥१।८।४८॥

ब्रह्मेत्युक्त्वा सुतं विप्र विरराम जगत्पतिः ।
रुरोद नारदस्तातमवोचत्संपुटाञ्जलिः ॥१।८।४९॥

नारद उवाच—

क्रोधं संहर संहर्तस्तात तात जगद्गुरो ।
स्रष्टुस्तपस्वीशस्याहो क्रोधोऽयं मय्यनाकरः ॥१।८।५०॥

शपेत्परित्यजेद्विद्वान्पुत्रमुत्पथगामिनम् ।
तपस्विनं सुतं शप्तुं कथमर्हसि पण्डित ॥१।८।५१॥

जनिर्भवतु मे ब्रह्मन्यासु यासु च योनिषु ।
न जहातु न हरेर्भक्तिर्मामिवं देहि मे वरम् ॥१।८।५२॥

पुत्रश्चेज्जगतां धातुर्नास्ति भक्तिर्हरेः पदे ।
सूकरादतिरिक्तश्च सो अधमो भारते भुवि ॥१।८।५३॥

× × ×

गोविन्दचरणाम्भोजभक्तिमाध्वीकमीप्सितम् ।
पिबतां वैष्णवादीनां स्पर्शपूता वसुन्धरा ॥१।८।५५॥

तीर्थानि स्पर्शमिच्छन्ति वैष्णवानां पितामह ।
पापानां पापितत्त्वानां क्षालनायाऽऽत्मनामपि ॥१।८।५६॥

मन्त्रोपदेशमात्रेण नरा मुक्ताश्च भारते ।
परैश्च कोटिपुरुषैः पूर्वैः सार्धं हरेरहो ॥१।८।५७॥

कोटिजन्मार्जितात्पापान्मन्त्रग्रहणमात्रतः ।
मुक्ताः शुध्यन्ति यत्पूर्वं कर्म निर्मूलयन्ति च ॥१।८।५८॥

पुत्रान्दारांश्च शिष्यांश्च सेवकान्बान्धवांस्तथा ।
यो दर्शयति सन्मार्गं सद्गतिस्तं लभेद् ध्रुवम् ॥१।८।५९॥
यो दर्शयत्यसन्मार्गं शिष्यैर्विश्वासितो गुरुः ।

कुम्भीपाके स्थितिस्तस्य यावच्चन्द्रदिवाकरौ ॥१।८।६०॥

स किंगुरुः स किंतातः स किंस्वामी स किंसुतः ।
यः श्रीकृष्णपदाम्भोजे भक्तिं दातुमनीश्वरः ॥१।८।६१॥

शप्तो निरपराधेन त्वयाऽहं चतुरानन ।
मया शप्तुं त्वमुचितो घ्नन्तं घ्नन्त्यपि पण्डिताः ॥१।८।६२॥

कवचस्तोत्रपूजाभिः सहितस्ते मनुर्मनोः ।
लुप्तो भवतु मच्छापात्प्रतिविश्वेषु निश्चितम् ॥१।८।६३॥

अपूज्यो भव विश्वेषु यात्कल्पत्रयं पितः ।
गतेषु त्रिषु कल्पेषु पूज्य पूज्यो भविष्यसि ॥१।८।६४॥

अधुना यज्ञभागस्ते व्रतादिष्वपि सुव्रत ।
पूजनं चास्तु नामैकं वन्द्यो भव सुरादिभिः ॥१।८।६५॥

इत्युक्त्वा नारदस्तत्र विरराम पितुः पुरः ।
तस्थौ सभायां स विधिर्हृदयेन विदूयता ॥१।८।६६॥

उपबर्हणगन्धर्वो नारदस्तेन हेतुना ।
दासीपुत्रश्च शापेन पितुरेव च शौनक ॥१।८।६७॥

ततः पुनर्नारदश्च स बभूव महानृषिः ।
ज्ञानं प्राप्य पितुः पश्चात्कथयिष्यामि चाधुना ॥१।८।६८॥

सौतिरुवाच—

अथ ब्रह्मा स्वपुत्रांस्तानादिदेश च सृष्टये ।
सृष्टिं प्रचक्रुस्ते सर्वे विप्रेन्द्र नारदं विना ॥१।९।१॥

मरीचेर्मनसो जातः कश्यपश्च प्रजापतिः ।
अत्रेर्नेत्रमलाच्चन्द्रः क्षीरोदे च बभूव ह ॥१।९।२॥

प्रचेतसोऽपि मनसो गौतमश्च बभूव ह ।
पुलस्त्यमनसः पुत्रो मैत्रावरुण एव च ॥१।९।३॥

मनोश्च शतरूपायां तिस्रः कन्याः प्रजज्ञिरे ।
आकूतिर्देवहूतिश्च प्रसूतिस्ताः पतिव्रताः ॥१।९।४॥

प्रियव्रतोत्तानपादौ द्वौ च पुत्रौ मनोहरौ ।
उत्तानपादतनयो ध्रुवः परमधार्मिकः ॥१।९।५॥

आकूतिं रुचये प्रादाद्दक्षायाथ प्रसूतिकाम् ।
देवहूतिं कर्दमाय यत्पुत्रः कपिलः स्वयम् ॥१।९।६॥

प्रसूत्यां दक्षबीजेन षष्ठिकन्याः प्रजज्ञिरे ।
अष्टौ धर्माय स ददौ रुद्रायैकादश स्मृताः ॥१।९।७॥

शिवायैकां सतीं प्रादात्कश्यपाय त्रयोदश ।
सप्तविंशतिकन्याश्च दक्षश्चन्द्राय दत्तवान् ॥१।९।८॥

नामानि धर्मपत्नीनां मत्तो विप्र निशामय ।
शान्तिः पुष्टिर्धृतिस्तुष्टिः क्षमा श्रद्धा मतिः स्मृतिः ॥१।९।९॥

शान्तेः पुत्रश्च संतोषः पुष्टेः पुत्रो महानभूत् ।
धृतेर्धैर्यं च तुष्ठेश्च हर्षदर्पौ सुतौ स्मृतौ ॥१।९।१०॥

क्षमापुत्रः सहिष्णुश्च श्रद्धापुत्रश्च धार्मिकः ।
मतेर्ज्ञानाभिधः पुत्रः स्मृतेर्जातिस्मरो महान् ॥१।९।११॥

पूर्वपत्न्यां च मूर्त्यां च नरनारायणावृषी ।
बभूवुरेते धर्मिष्ठा धर्मपुत्राश्च शौनक ॥१।९।१२॥

नामानि रुद्रपत्नीनां सावधानं निबोध मे ।
कला कलावती काष्ठा कालिका कलहप्रिया ॥१।९।१३॥

कन्दली भीषणा रास्ना प्रमोचा भूषणा शुकी ।
एतासां बहवः पुत्रा बभूवुः शिवपार्षदाः ॥१।९।१४॥

सा सती स्वामिनिन्दायां तनुं तत्याज्य यज्ञतः ।
पुनर्भूत्वा शैलपुत्री लेभे सा शङ्करं पतिम् ॥१।९।१५॥

कश्यपस्य प्रियाणां च नामानि शृणु धार्मिक ।
अदितिर्देवमाता वै दैत्यमाता दितिस्तथा ॥१।९।१६॥

सर्पमाता तथा कद्रूर्विनता पक्षिसूस्तथा ।
सुरभिश्च गवां माता महिषाणां च निश्चित्तम् ॥१।९।१७॥

सारमेयादिजन्तूनां सरमा सूश्चतुष्पदाम् ।
दनुः प्रसूर्दानवानामन्याश्चेत्येवमादिकाः ॥१।९।१८॥

इन्द्रश्च द्वादशादित्या उपेन्द्राद्याः सुरा मुने ।
कथिताश्चादितेः पुत्रा महाबलपराक्रमाः ॥१।६।१६॥

इन्द्रपुत्रो जयन्तश्च ब्रह्मञ्शच्यामजायत ।
आदित्यस्य सवर्णायां कन्यायां विश्वकर्मणः ॥१।६।२०॥

शनैश्चरयमौ पुत्रौ कालिन्दी कन्यका तथा ।
उपेन्द्रवीर्यात्पृथ्व्यां तु मङ्गलः समजायत ॥१।६।२१॥

× × ×

कतिकल्पान्तरेऽतीते स्रष्टुः सृष्टिविधौ पुनः ।
मरीचिमिश्रैर्मुनिभिः सार्धं कण्ठाद्बभूव सः ॥१।२२।१॥

विधेर्नरदनाम्नश्च कण्ठदेशाद्बभूव सः ।
नारदश्चेति विख्यातो मुनीन्द्रस्तेन हेतुना ॥१।२२।२॥

यः पुत्रश्चेतसो धातुर्बभूव मुनिपुङ्गवः ।
तेन प्रचेता इति च नाम चक्रे पितामहः ॥:।२२।३॥

बभूव धातुर्यः पुत्रः सहसा दक्षपार्श्वतः ।
सर्वकर्माणि दक्षश्च तेन दक्षः प्रकीर्तितः ॥१।२२।४॥

वेदेषु कर्दमः शब्दश्छायायां वर्तते स्फुटः ।
बभूव कर्दमाद्बालः कर्दमस्तेन कीर्तितः ॥१।२२।५॥

तेजोभेदे मरीचिश्च वेदेषु वर्तते स्फुटम् ।
जातः सद्योऽतितेजस्वी मरीचिस्तेन कीर्तितः ॥१।२२।६॥

क्रतुसंघश्च बालेन कृतो जन्मान्तरेऽधुना ।
ब्रह्मपुत्रेऽपि तन्नाम क्रतुरीत्यभिधीयते ॥१।२२।७॥

प्रधानाङ्गं मुखं धातुस्ततो जातश्च बालकः ।
इरस्तेजस्विवचनोऽप्यङ्गिरास्तेन कीर्तितः ॥१।२२।८॥

अतितेजस्विनि भृगुर्वर्तते नाम्नि शौनक ।
जातः सद्योऽतितेजस्वी भृगुस्तेन प्रकीर्तितः ॥१।२२।६॥

बालोऽप्यरुणवर्णश्च जातः सद्योऽतितेजसा ।
प्रज्वलन्नूर्ध्वतपसा चारुणिस्तेन कीर्तितः ॥१।२२।१०॥

हंसा आत्मवशा यस्य योगेन योगिनो ध्रुवम् ।
बालः परमयोगीन्द्रस्तेन हंसी प्रकीर्तितः ॥१।२२।११॥

वशीभूतश्च शिष्यश्च जातः सद्यो हि बालकः ।
प्रतिप्रियश्च धातुश्च वशिष्ठस्तेन कीर्तितः ॥१।२२।१२॥

संततं यस्य यत्नश्च तपःसु बालकस्य च ।
प्रकीर्तितः यतिस्तेन संयतः सर्वकर्मसु ॥१।२२।१३॥

पुलस्तपःसु वेदेषु वर्तते हः स्फुटेऽपि ।
स्फुटस्तपः समूहश्च पुलहस्तेन बालकः ॥१।२२।१४॥

पुलस्तपःसमूहश्च यस्यास्ति पूर्वजन्मनाम् ।
तपःसंघस्वरूपश्च पुलस्त्यस्तेन बालकः ॥१।२२।१५॥

त्रिगुणायां प्रकृत्यां त्रिविष्णावश्च प्रवर्तते ।
तयोर्भक्तिः समा यस्य तेन बालोऽत्रिरुच्यते ॥१।२२।१६॥

जटा वह्निशिखारूपाः पञ्च सन्ति च मस्तके ।
तपस्तेजोभवा यस्य स च पञ्चशिखः स्मृतः ॥१।२२।१७॥

अपान्तरतमे देशे तपस्तेपेऽन्यजन्मनि ।
अपान्तरतमा नाम शिशोस्तेन प्रकीर्तितम् ॥१।२२।१८॥

स्वयं तपः समाप्नोति वाहयेत्प्रापयेत्परान् ।
वोढुं समर्थस्तपसि वोढुस्तेन प्रकीर्तितः ॥१।२२।१९॥

तपसस्तेजसा बालो दीप्तिमान्सततं मुने ।
तपःसु रोचते चित्तं रुचिस्तेन प्रकीर्तितः ॥१।२२।२०॥

× × ×

रुद्रेष्वेकतमो वाऽन्यो महेश इति मे भ्रमः ।
भवान्पुराणतत्त्वज्ञः संदेहं छेत्तुमर्हति ॥१।२२।२२॥

सौतिरुवाच—

विष्णुः सत्त्वगुणः पाता ब्रह्मा स्रष्टा रजोगुणः ।
तमोगुणास्ते रुद्राश्च दुर्निवारा भयङ्कराः ॥१।२२॥२३॥

× × ×

सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
सनत्कुमारो भगवांश्चतुर्थो ब्रह्मणः सुतः ॥१।२२।२७॥

ब्रह्मा स्रष्टुं पूर्वपुत्रानुवाच ते न सेहिरे ।
तेन प्रकोपितो धाता रुद्राः कोपोद्भवा मुने ॥१।२२।२८॥

सनकश्च सनन्दश्च तौ द्वावानन्दवाचकौ ।
आनन्दितौ च बालौ द्वौ भक्तिपूर्णतमौ सदा ॥१।२२।२९॥

सनातनश्च श्रीकृष्णो नित्यः पूर्णतमः स्वयम् ।
तद्भक्तस्तत्समः सत्यं तेन बालः सनातनः ॥१।२२।३०॥
सनत्तु नित्यवचनः कुमारः शिशुवाचकः ।
सनत्कुमारं तेनेममुवाच कमलोद्भवः ॥१।२२।३१॥

× × ×

सौतिरुवाच—

स्रष्टा सृष्टिविधानेन नियोज्य सर्वबालकान् ।
नारदं प्रेरयामास सृष्टिं कर्त्तुं च शौनक ॥१।२३।१॥

हितं सत्यं वेदसारं परिणामसुखावहम् ।
उवाच नारदं ब्रह्मा वेदवेदाङ्गपारगम् ॥१।२३।२॥

ब्रह्मोवाच—

एहि वत्स कुलश्रेष्ठ नारद प्राणवल्लभ ।
ज्ञानदीपशिखाज्ञानतिमिरक्षयकारक ॥१।२३।३॥

सर्वेषामपि वन्द्यानां जनकः परमो गुरुः ।
विद्यादाता मन्त्रदाता द्वौ समौ च पितुः परौ ॥१।२३।४॥

तवाहं जनकः पुत्र विद्यादाता च पालकः ।
ममाऽऽज्ञया च मत्प्रीत्या कुरु दारपरिग्रहम् ॥१।२३।५॥

स च शिष्यः सोऽपि पुत्रो यश्चाऽऽज्ञां पालयेद्गुरोः ।
न क्षेमं तस्य मूढस्य यो गुरोरवचस्करः ॥१।२३।६॥

स पण्डितः स च ज्ञानी स क्षेमी स च पुण्यवान् ।
गुरोर्वचस्करो यो हि क्षेमं तस्य पदे पदे ॥१।२३।७॥

सर्वेषामाश्रमाणां च प्रधानः पुण्यवान्गृही ।
स्त्रीपुत्रपौत्रयुक्तं च मन्दिरं तपसः फलम् ॥१।२३।८॥

पितरः पूर्वकाले च तिथिकाले च देवताः ।
सर्वे गृहस्थमायान्ति निपानमिव धेनवः ॥१।२३।६॥

नित्यं नैमित्तिकं काम्यं कुर्वन्ति गृहिणः सदा ।
इह एतत्सुखं पुण्यं स्वर्गभोगः परत्र च ॥१।२३।१०॥

जीवन्मुक्तो गृहस्थश्च स्वधर्मपरिपालकः ।
यशस्वी पुण्यवांश्चैव कीर्तिमान्धनवान्सुखी ॥१।२३।११॥

यशस्वी कीर्तिमान्यो हि मृतो जीवति संततम् ।
यशःकीर्तिविहीनो हि जीवन्नपि मृतो हि सः ॥१।२३।१२॥

ब्रह्मणः वचनं श्रुत्वा नारदो मुनिसत्तमः ।
उवाच विनयं भीतः शुष्ककण्ठौष्ठतालुकः ॥१।२३।१३॥

नारद उवाच—

× × ×

दारग्रहो हि दुःखाय केवलं न सुखाय च ।
तपःस्वर्गभक्तिकर्मणां व्यवधायकः ॥१।२३।२०॥

योषितस्त्रिविधा ब्रह्मन्गृहिणां मूढचेतसाम् ।
साध्वी भोग्या च कुलटास्ताः सर्वाः स्वार्थतत्पराः ॥१।२३।२१॥

परलोकभिया साध्वी तथेह यशसाऽऽत्मनः ।
कामस्नेहाच्च कुरुते भर्त्तुः सेवां च संततम् ॥१।२३।२२॥

भोग्या भोगार्थिनी शश्वत्कामस्नेहेन केवलम् ।
कुरुते कान्तसेवां च न च भोगादृते क्षणम् ॥१।२३।२३॥

× × ×

इत्येवं कथितं सर्वं ब्रह्मन्नात्मागमो यथा ।
सर्वं जानासि सर्वज्ञ स्वात्मारामेश्वरो भवान् ॥१।२३।३८॥

अनुग्रहं कुरु विभो विदायं देहि साम्प्रतम् ।
कृष्णभक्तिं प्रार्थयामि त्वयि कल्पतरोः परे ॥१।२३।३९॥

इत्युक्त्वा नारदस्तत्र धृत्वा तातपदाम्बुजम् ।
आज्ञां ययाचे पिरं गन्तुं तपसि मङ्गले ॥१।२३।४०॥

कृताञ्जलिपुटो भूत्वा भक्तिनम्रात्मकंधरः ।
कृत्वा प्रदक्षिणं नत्वा ब्रह्माणं गन्तुमुद्यतः ॥१।२३।४१॥

गच्छन्तं तनयं दृष्ट्वा विधाता जगतां मुने ।
रुरोदोच्चैर्मुक्तकण्ठं महासांसारिको यथा ॥१।२३।४२॥

करे धृत्वा समालिङ्गय चुचुम्ब च पुनः पुनः ।
चिरं वक्षसि कृत्वा च वासयामास जानुनि ॥१।२३।४३॥

स्वात्मारामेश्वरो ब्रह्मा योगीन्द्राणां गुरोर्गुरुः ।
भेदं सोढुं न शक्तोऽभूद्विच्छेदो दुःसहो नृणाम् ॥१।२३।४४॥

कातरः पुत्रभेदेन मोहितो विष्णुमायया ।
शोकार्तो वक्तुमारेभे सुतं संबोध्य शौनक ॥१।२३।४५॥

श्रीब्रह्मोवाच—

त्वं गच्छ तपसे वत्स किं मे संसारकर्मणि ।
अहं यास्यामि गोलोकं विज्ञातुं कृष्णमीश्वरम् ॥१।२४।१॥

सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
सनत्कुमारो वैरागीचतुर्थः पुत्र एव च ॥१।२४।२॥

यती हंसी चारुणिश्च वोढुः पञ्चशिखस्तथा ।
पुत्रास्तपस्विनः सर्वे किं मे संसारकर्मणि ॥१।२४।३॥

वचस्करो मरीचिर्मे अङ्गिराश्च भृगुस्तथा ।
रुचिरत्रिः कर्दमश्च प्रचेताश्च क्रतुर्मनुः ॥१।२४।४॥

वसिष्ठो वशगः शश्वत्सर्वेषु च सुतेषु च ।
अन्येऽविवेकिनोऽसाध्याः किं मे संसारकर्मणि ॥१।२४।५॥

निबोध वत्स वक्ष्यामि वेदोक्तं वचनं शुभम् ।
पारम्पर्यक्रमपरं चतुर्वर्गफलप्रदम् ॥१।२४।६॥

धर्मार्थकाममोक्षांश्च सर्वे वाञ्छन्ति पण्डिताः ।
वेदप्रणिहितानेतान्सभासु मुनिशंसितान् ॥१।२४।७॥

वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः ।
आदौ विप्रो यज्ञसूत्रं परिधाय सुखं सुखी ॥१।२४।८॥

समधीत्य ततो वेदान्ददाति गुरुदक्षिणाम् ।
ततः प्रकृष्टकुलजां सुविनीतां समुद्वहेत् ॥१।२४।९॥

सा साध्वी कुलजा या च पतिसेवासु तत्परा ।

सद्वंशे दुर्विनीता च संभवेन्न कदाचन ॥
आकरे पद्मरागाणां जन्म काचमणेः कुतः ॥१।२४।१०॥

असद्वंशप्रसूता या पित्रोर्दोषेण नारद ।
दुर्विनीता च सा दुष्टा स्वतंत्रा सर्वकर्मसु ॥१।२४।११॥

न वत्स दुष्टाः सर्वाश्च योषितः कमलाकलाः ।
स्वर्वेश्यांशाश्च कुलटा असद्वंशसमुद्भवाः ॥१।२४।१२॥

निर्गुणं स्वामिनं साध्वी सेवते च प्रशंसति ।
न सेवते च कुलटा प्रियं निन्दति सद्गुणम् ॥१।२४।१३॥

साधुः सद्वंशजां कन्यां प्रयत्नेन परिग्रहेत् ।
तस्यां पुत्रान्समुत्पाद्य वृद्धस्तु तपसे व्रजेत् ॥१।२४।१४॥

वरं हुतवहे वासः सर्पवक्त्रे च कण्टके ।
एतेभ्यो दुःखदो वासः स्त्रिया दुर्मुखया सह ॥१।२४।१५॥

मत्तोऽधीतस्त्वया वेदो मह्यं च गुरुदक्षिणाम् ।
पुत्र देहीदमेवेह कुरु दारपरिग्रहम् ॥१।२४।१६॥

वत्स त्वं कुलजातां च पूर्वपत्नीं च मालतीम् ।
विवाहं कुरु कल्याण कल्याणे च दिनेऽनघ ॥१।२४।१७॥

मनुवंशोद्भवस्येह सृञ्जयस्य गृहे सती ।
त्वत्कृते जन्म लब्ध्वा च कुरुते भारते तपः ॥१।२४।१८॥

गृह्णीष्व परमां रत्नमालां च कमलाकलाम् ।
भारते न भवेद्व्यर्थं जनानां तपसः फलम् ॥१।२४।१९॥

× × ×

पुत्त्रप्रयोजना कान्ता शतकान्ताप्रियः सुतः ।
नास्ति पुत्रात्परो बन्धुर्नास्ति पुत्रात्परः प्रियः ॥१।२४।२८॥

सर्वेभ्यो जयमन्विच्छेत्पुत्रादेकात्पराजयम् ।
न चाऽऽत्मनोऽप्रियोऽर्थश्च तस्मादपि सुतः प्रियः ॥१।२४।२९॥

अतः प्रियतमे पुत्रे न्यसेदात्मपरं धनम् ।

इत्येवमुक्त्वा स ब्रह्मा विरराम च शौनक ॥
उवाच वचनं तातं नारदो ज्ञानिनां वरः ॥१।२४।३०॥

नारद उवाच—

स्वयं विज्ञाय सर्वार्थं स्वपुत्रं वेददर्शने ।
प्रवर्तयत्यसन्मार्गे स दयालुः कथं पिता ॥१।२४।३१॥

जलबुद्बुदवत्सर्वं संसारमतिनश्वरम् ।
जलरेखा यथा मिथ्या तथा ब्रह्मञ्जगत्त्रयम् ॥१।२४।३२॥

विहाय हरिदास्यं च विषये यन्मनश्चलम् ।
दुर्लभं मानवं जन्म मा भूत्तन्निष्फलं क्वचित् ॥१।२४।३३॥

का वा कस्य प्रियो पुत्रो बन्धुः को वा भवार्णवे ।
कर्मोर्मिभिर्योजना च तदपायो वियोजना ॥१।२४।३४॥

सुकर्म कारयेद्यो हि तन्मित्रं स पिता गुरुः ।
दुर्बुद्धिं जनयेद्यो हि स रिपुः स्यात्कथं पिता ॥१।२४।३५॥

इत्येवं कथितं तात वेदबीजं यथागमम् ।
ध्रुवं तथाऽपि कर्त्तव्यं तवाऽऽज्ञापरिपालनम् ॥१।२४।३६॥

आदौ यास्यामि भगवन्नरनारायणाश्रमम् ।
नारायणकथां श्रुत्वा करिष्ये दारसंग्रहम् ॥१।२४।३७॥

× × ×

नारद उवाच—

देहि मे कृष्णमंत्रं च यन्मनोवाञ्छितं मम ।
तत्संबन्धि च यज्ज्ञानं यत्र तद्गुणवर्णनम् ॥१।२४।४०॥

ततः पश्चात्करिष्यामि त्वत्प्रीत्या दारसंग्रहम् ।
मानसे परिपूर्णे च कार्यं कर्तुं पुमान्सुखी ॥१।२४।४१॥

नारदस्य वचः श्रुत्वा प्रहृष्टः कमलोद्भवः ।
उवाच पुनरेवेदं पुत्रं ज्ञानविदां वरः ॥१।२४।४२॥

ब्रह्मोवाच—

पत्युर्मन्त्रं पितुर्मन्त्रं न गृह्णीयाद्विचक्षणः ।
विविक्ताश्रमिणां चैव न मन्त्रः सुखदायकः ॥१।२४।४३॥

निषेकाल्लभ्यते मंत्रो गुरुर्भर्ता च कामिनी ।
विद्या सुखं भयं दुःखं पुरुषैः स्वेच्छया न च ॥१।२४।४४॥

महेश्वरस्तव गुरुः प्राक्तनो नः पुरातनः ।
गच्छ वत्स शिवं शान्तं शिवदं ज्ञानिनां गुरुम् ॥१।२४।४५॥

तत एव भवान्मन्त्रं ज्ञानं लब्ध्वा पुरातनात् ।
नारायणकथां श्रुत्वा शीघ्रमागच्छ मद्गृहम् ॥१।२४।४६॥

इत्युक्त्वा जगतां धाता विरराम च शौनक ।
प्रणम्य पितरं भक्त्या शिवलोकं ययौ मुनिः ॥१।२४।४७॥

३. कूर्मपुराणम्

अध्याय १/६

सूत उवाच

एतच्छ्रुत्वा तु वचनं नारदाद्या महर्षयः ।
प्रणम्य वरदं विष्णुं प्रपच्छुः संशयान्विताः ॥१

ऋषय ऊचुः—

कथितो भवता सर्गो मुख्यादीनां जनार्दन ।
इदानीं संशयं चेममस्माकं छेत्तुमर्हसि ॥२

कथं स भगवानीशः पूर्वजोऽपि पिनाकधृक् ।
पुत्रत्वमगच्छंभुर्ब्रह्मणोऽव्यक्तजन्मनः ॥३

कथं च भगवाञ्जज्ञे ब्रह्मा लोकपितामहः ।
अण्डजो जगतामीशस्तन्नो वक्तुमिहार्हसि ॥४

श्रीकूर्म उवाच—

शृणुध्वमृषयः सर्वे शंकरस्यामितौजसः ।
पुत्रत्वं ब्रह्मणस्तस्य पद्मयोनित्वमेव च ॥५

अतीतकल्पावसाने तमोभूतं जगत् त्रयम् ।
आसीदेकार्णवं सर्वं न देवाद्या न चर्षयः ॥६

तत्र नारायणो देवो निर्जने निरुपप्लवे ॥
आश्रित्य शेषशयनं सुष्वाप पुरुषोत्तमः ॥७

सहस्रशीर्षा भूत्वा स सहस्राक्षः सहस्रपात् ।
सहस्रबाहुः सर्वज्ञश्चिन्त्यमानो मनीषिभिः ॥८

पीतवासा विशालाक्षो नीलजीमूतसन्निभः ।
महाविभूतिर्योगात्मा योगिनां हृदयालयः ॥९

कदाचित् तस्य सुप्तस्य लीलार्थं दिव्यमद्भुतम् ।
त्रैलोक्यसारं विमलं नाभ्यां पङ्कजमुद्बभौ ॥१०

शतयोजनविस्तीर्णं तरुणादित्यसन्निभम् ।
दिव्यगन्धमयं पुण्यं कर्णिकाकेसरान्वितम् ॥११

तस्यैवं सुचिरं कालं वर्तमानस्य शार्ङ्गिणः ।
हिरण्यगर्भो भगवांस्तं देशमुपचक्रमे ॥१२

स तं करेण विश्वात्मा समुत्थाप्य सनातनम् ।
प्रोवाच मधुरं वाक्यं मायया तस्य मोहितः ॥१३

अस्मिन्नेकार्णवे घोरे निर्जने तमसावृते ।
एकाकी को भवाञ्छेते ब्रूहि मे पुरुषर्षभ ॥१४

तस्य तद् वचनं श्रुत्वा विहस्य गरुडध्वजः ।
उवाच देवं ब्रह्माणं मेघगम्भीरनिःस्वनः ॥१५

भो भो नारायणं देवं लोकानां प्रभवाप्ययम् ।
महायोगेश्वरं मां त्वं जानीहि पुरुषोत्तमम् ॥१६

मयि पश्य जगत् कृत्स्नं त्वां च लोकपितामहम् ।
सपर्वतमहाद्वीपं समुद्रैः सप्तभिर्वृतम् ॥१७

एवमाभाष्य विश्वात्मा प्रोवाच पुरुषं हरिः ।
जानन्नपि महायोगी को भवानिति वेधसम् ।।१८

ततः प्रहस्य भगवान् ब्रह्मा वेदनिधिः प्रभुः ।
प्रत्युवाचाम्बुजाभाक्षं सस्मितं श्लक्ष्णया गिरा ।।१९

अहं धाता विधाता च स्वयंभूः प्रपितामहः ।
मय्येव संस्थितं विश्वं ब्रह्माऽहं विश्वतोमुखः ।।२०

श्रुत्वा वाचं स भगवान् विष्णुः सत्यपराक्रमः ।
अनुज्ञाप्याथ योगेन प्रविष्टो ब्रह्मणस्तनुम् ।।२१

त्रैलोक्यमेतत् सकलं सदेवासुरमानुषम् ।
उदरे तस्य देवस्य दृष्ट्वा विस्मयमागतः ।।२२

तदास्य वक्त्रान्निष्क्रम्य पन्नगेन्द्रनिकेतनः ।
अजातशत्रुर्भगवान् पितामहमथाब्रवीत् ।।२३

भवानप्येवमेवाद्य शाश्वतं हि ममोदरम् ।
प्रविश्य लोकान् पश्यैतान् विचित्रान् पुरुषर्षभ ।।२४

ततः प्रह्लादनीं वाणीं श्रुत्वा तस्याभिनन्द्य च ।
श्रीपतिरुदरं भूयः प्रविवेश कुशध्वजः ।।२५

तानेव लोकान् गर्भस्थानपश्यत् सत्यविक्रमः ।
पर्यटित्वा तु देवस्य ददृशेऽन्तं न वै हरेः ।।२६

ततो द्वाराणि सर्वाणि पिहितानि महात्मना ।
जनार्दनेन ब्रह्माऽसौ नाभ्यां द्वारमविन्दत ।।२७

तत्र योगबलेनासौ प्रविश्य कनकाण्डजः ।
उज्जहारात्मनो रूपं पुष्कराच्चतुराननः ।।२८

विरराजारविन्दस्थः पद्मगर्भसमद्युतिः ।
ब्रह्मा स्वयंभूर्भगवान् जगद्योनिः पितामहः ।।२९

समन्यमानो विश्वेशमात्मानं परमं पदम् ।
प्रोवाच पुरुषं विष्णुं मेघगम्भीरया गिरा ।।३०

किं कृतं भवतेदानीमात्मनो जयकाङ्क्षया ।
एकोऽहं प्रबलो नान्यो मां वै कोऽभिभविष्यति ।।३१

श्रुत्वा नारायणो वाक्यं ब्रह्मणो लोकतन्त्रिणः ।
सान्त्वपूर्वमिद वाक्यं बभाषे मधुरं हरिः ॥३२

भवान् धाता विधाता च स्वयंभूः प्रपितामहः ।
न मात्सर्याभियोगेन द्वाराणि पिहितानि मे ॥३३

किन्तु लीलार्थमेवैतन्न त्वां बाधितुमिच्छया ।
को हि बाधितुमन्विच्छेद् देवदेवं पितामहम् ॥३४

न तेऽन्यथाऽवगन्तव्यं मान्यो मे सर्वथा भवान् ।
सर्वमन्वय कल्याणं यन्मयाऽपहृतं तव ॥३५

अस्माच्च कारणाद् ब्रह्मन् पुत्रो भवतु मे भवान् ।
पद्मयोनिरिति ख्यातो मत्प्रियार्थं जगन्मय ॥३६

ततः स भगवान् देवो वरं दत्वा किरीटिने ।
प्रहर्षमतुलं गत्वा पुनर्विष्णुमभाषत ॥३७

भवान् सर्वात्मकोऽनन्तः सर्वेषां परमेश्वरः ।
सर्वभूतान्तरात्मा वै परं ब्रह्म सनातनम् ॥३८

अहं वै सर्वलोकानामात्मा लोकमहेश्वरः ।
मन्मयं सर्वमेवेदं ब्रह्माऽहं पुरुषः परः ॥३९

नावाभ्यां विद्यते ह्यन्यो लोकानां परमेश्वरः ।
एका मूर्तिर्द्विधा भिन्ना नारायणपितामहौ ॥४०

तेनैवमुक्तो ब्रह्माणं वासुदेवोऽब्रवीदिदम् ।
इयं प्रतिज्ञा भवतो विनाशाय भविष्यति ॥४१

किं न पश्यसि योगेशं ब्रह्माधिपतिमव्ययम् ।
प्रधानपुरुषेशानं वेदाहं परमेश्वरम् ॥४२

यं न पश्यन्ति योगीन्द्राः सांख्या अपि महेश्वरम् ।
अनादिनिधनं ब्रह्म तमेव शरणं व्रज ॥४३

ततः क्रुद्धोऽम्बुजाभाक्षं ब्रह्मा प्रोवाच केशवम् ।
भवान् न नूनमात्मानं वेत्ति तत् परमक्षरम् ॥४४

ब्रह्माणं जगतामेकमात्मानं परमं पदम् ।
नावाभ्यां विद्यते ह्यन्यो लोकानां परमेश्वरः ॥४५

संत्यज्य निद्रां विपुलां स्वात्मानं विलोकय ।
तस्य तत् क्रोधजं वाक्यं श्रुत्वा विष्णुरभाषत ॥४६

मा मैवं वद कल्याण परिवादं महात्मनः ।
न मेऽस्त्यविदितं ब्रह्मन् नान्यथाऽहं वदामि ते ॥४७

किन्तु मोहयति ब्रह्मन् भवन्तं पारमेश्वरी ।
मायाऽशेषविशेषाणां हेतुरात्मसमुद्भवा ॥४८

एतावदुक्त्वा भगवान् विष्णुस्तूष्णीं बभूव ह ।
ज्ञात्वा तत् परमं तत्त्वं स्वमात्मानं महेश्वरम् ॥४९

कुतोऽप्यपरिमेयात्मा भूतानां परमेश्वरः ।
प्रसादं ब्रह्मणे कर्त्तुं प्रादुरासीत् ततो हरः ॥५०

ललाटनयनोऽनन्तो जटामण्डलमण्डितः ।
त्रिशूलपाणिर्भगवांस्तेजसां परमो निधिः ॥५१

दिव्यां विशालां ग्रथितां ग्रहैः सार्केन्दुतारकैः ।
मालामत्यद्भुताकारां धारयन् पादलम्बिनीम् ॥५२

तं दृष्ट्वा देवमीशानं ब्रह्मा लोकपितामहः ।
मोहितो माययाऽत्यर्थं पीतवाससमब्रवीत् ॥५३

क एष पुरुषोऽनन्तः शूलपाणिस्त्रिलोचनः ।
तेजोराशिरमेयात्मा समायाति जनार्दन ॥५४

तस्य तद् वचनं श्रुत्वा विष्णुर्दानवमर्दनः ।
अपश्यदीश्वरं देवं ज्वलन्तं विमलेऽम्भसि ॥५५

ज्ञात्वा तत्परमं भावमैश्वरं ब्रह्मभावनम् ।
प्रोवाचोत्थाय भगवान् देवदेवं पितामहम् ॥५६

अयं देवो महादेवः स्वयंज्योतिः सनातनः ।
अनादिनिधनोऽचिन्त्यो लोकानामीश्वरो महान् ॥५७

शङ्करः शम्भुरीशानः सर्वात्मा परमेश्वरः ।
भूतानामधिपो योगी महेशो विमलः शिवः ॥५८

एष धाता विधाता च प्रधानपुरुषेश्वरः ।
यं प्रपश्यन्ति यतयो ब्रह्मभावेन भाविताः ॥५९

सृजत्येष जगत् कृत्स्नं पाति संहरते तथा ।
कालो भूत्वा महादेवः केवलो निष्कलः शिवः ॥६०

ब्रह्माणं विदधे पूर्वं भवन्तं यः सनातनः ।
वेदांश्च प्रददौ तुभ्यं सोऽयमायाति शङ्करः ॥६१

अस्यैव चापरां मूर्तिं विश्वयोनिं सनातनीम् ।
वासुदेवाभिधानां मामवेहि प्रपितामह ॥६२

किं न पश्यसि योगेशं ब्रह्माधिपतिमव्ययम् ।
दिव्यं भवतु ते चक्षुर्येन द्रक्ष्यसि तत्परम् ॥६३

लब्ध्वा शैवं तदा चक्षुर्विष्णोर्लोकपितामहः ।
बुबुधे परमेशानं पुरतः समवस्थितम् ॥६४

स लब्ध्वा परमं ज्ञानमैश्वरं प्रपितामहः ।
प्रपेदे शरणं देवं तमेव पितरं शिवम् ॥६५

ओंकारं समनुस्मृत्य संस्तभ्यात्मानमात्मना ।
अथर्वशिरसा देवं तुष्टाव च कृताञ्जलिः ॥६६

संस्तुतस्तेन भगवान् ब्रह्मणा परमेश्वरः ।
अवाप परमां प्रीतिं व्याजहार स्मयन्निव ॥६७

मत्समस्त्वं न संदेहो मद्भक्तश्च यतो भवान् ।
मयैवोत्पादितः पूर्वं लोकसृष्ट्यर्थमव्ययम् ॥६८

त्वमात्मा ह्यादिपुरुषो मम देहसमुद्भवः ।
वरं वरय विश्वात्मन् वरदोऽहं तवानघ ॥६९

स देवदेववचनं निशम्य कमलोद्भवः ।
निरीक्ष्य विष्णुं पुरुषं प्रणम्याह वृषध्वजम् ॥७०

भगवन् भूतभव्येश महादेवाम्बिकापते ।
त्वामेव पुत्रमिच्छामि त्वया वा सदृशं सुतम् ॥७१

मोहितोऽस्मि महादेव मायया सूक्ष्मया त्वया ।
न जाने परमं भावं याथातथ्येन ते शिव ।।७२

त्वमेव देव भक्तानां भ्राता माता पिता सुहृत् ।
प्रसीद तव पादाब्जं नमामि शरणं गतः ॥७३

स तस्य वचनं श्रुत्वा जगन्नाथो वृषध्वजः ।
व्याजहार तदा पुत्रं समालोक्य जनार्दनम् ॥७४

यदर्थितं भगवता तत् करिष्यामि पुत्रक ।
विज्ञानमैश्वरं दिव्यमुत्पत्स्यति तवानघ ॥७५

त्वमेव सर्वभूतानामादिकर्ता नियोजितः ।
तथा कुरुष्व देवेश मया लोकपितामह ॥७६

एष नारायणोऽनन्तो ममैव परमा तनुः ।
भविष्यति तवेशानो योगक्षेमवहो हरिः ॥७७

× × ×

अध्याय १।४४

सूत उवाच

Regarding residence of Brahmā :

चतुर्दशसहस्राणि योजनानां महापुरी ।
मेरोरुपरि विख्याता देवदेवस्य वेधसः ॥१

तत्रास्ते भगवान् ब्रह्मा विश्वात्मा विश्वभावनः ।
उपास्यमानो योगीन्द्रैर्मनीन्द्रोपेन्द्रशङ्करैः ॥२

तत्र देवेश्वरेशानं विश्वात्मानं प्रजापतिम् ।
सनत्कुमारो भगवानुपास्ते नित्यमेव हि ॥३

स सिद्धैर्ऋषिगन्धर्वैः पूज्यमानः सुरैरपि ।
समास्ते योगयुक्तात्मा पीत्वा तत्परमामृतम् ॥४

तत्र देवादिदेवस्य शंभोरमिततेजसः ।
दीप्तमायतनं शुभ्रं पुरस्ताद् ब्रह्मणः स्थितम् ॥५

Onwards is the mention of the abodes of other gods :

× × ×

अध्याय २।८

ईश्वर उवाच

अन्यद् गुह्यतमं ज्ञानं वक्ष्ये ब्राह्मणपुङ्गवाः ।
येनासौ तरते जन्तुर्घोरं संसारसागरम् ॥१

अहं ब्रह्ममयः शान्तः शाश्वतो निर्मलोऽव्ययः ।
एकाकी भगवानुक्तः केवलः परमेश्वरः ॥२

मम योनिर्महद् ब्रह्म तत्र गर्भं दधाम्यहम् ।
मूलं मायाभिधानं तु ततो जातमिदं जगत् ॥३

प्रधानं पुरुषो ह्यात्मा महान् भूतादिरेव च ।
तन्मात्राणि महाभूतानीन्द्रियाणि च जज्ञिरे ॥४

ततोऽण्डमभवद्धैमं सूर्यकोटिसमप्रभम् ।
तस्मिन् जज्ञे महाब्रह्मा मच्छक्त्या चोपबृंहितः ॥५

ये चान्ये बहवो जीवा मन्मयः सर्व एव ते ।
न मां पश्यन्ति पितरं मायया मम मोहिताः ॥६

याश्च योनिषु सर्वासु संभवन्ति हि मूर्त्तयः ।
तासां माया परा योनिर्मामेव पितरं विदुः ॥७

यो मामेवं विजानाति बीजिनं पितरं प्रभुम् ।
स धीरः सर्वलोकेषु न मोहमधिगच्छति ॥८

ईशानः सर्वविद्यानां भूतानां परमेश्वरः ।
ओङ्कारमूर्तिर्भगवानहं ब्रह्मा प्रजापतिः ॥९

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥१०

समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥११

विदित्वा सप्त सूक्ष्माणि षडङ्गं च महेश्वरम् ।
प्रधानविनियोगज्ञः परं ब्रह्माधिगच्छति ॥१२

सर्वज्ञता तृप्तिरनादिबोधः
स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभोर्विदित्वा
षडाहुरङ्गानि महेश्वरस्य ॥१३

तन्मात्राणि मन आत्मा च तानि
सूक्ष्माण्याहुः सप्त तत्त्वात्मकानि ।
या सा हेतुः प्रकृतिः सा प्रधानं
बन्धः प्रोक्तो विनियोगोऽपि तेन ॥१४

या सा शक्तिः प्रकृतौ लीनरूपा
वेदेषूक्ता कारणं ब्रह्मयोनिः ।
तस्या एकः परमेष्ठी परस्ता-
न्महेश्वरः पुरुषः सत्यरूपः ॥१५

ब्रह्मा योगी परमात्मा महीयान्
व्योमव्यापी वेदवेद्यः पुराणः ।
एको रुद्रो मृत्युरव्यक्तमेकं
बीजं विश्वं देव एकः स एव ॥१६

तमेवैकं प्राहुरन्येऽप्यनेकं
त्वेकात्मानं केचिदन्यत्तथाहुः ।
अणोरणीयान् महतोऽसौ महीयान्
महादेवः प्रोच्यते वेदविद्भिः ॥१७

एवं हि यो वेद गुहाशयं परं
प्रभुं पुराणं पुरुषं विश्वरूपम् ।
हिरण्मयं बुद्धिमतां परां गतिं
स बुद्धिमान् बुद्धिमतीत्य तिष्ठति ॥१८

See other references *KūrP.*,

Creation of the three worlds by Brahmā (Chapter 1/10); Description of Kaśyapa's family, also of Pulaha, Pulastya, Marīci, etc., (Chapt. 1/18); Brahmā eulogises Śiva (Chapt. 1/25); Brahmā eulogises Pārvatī, etc., (Chapt. 2/31).

४. मत्स्यपुराणम्

अध्याय ३

मनुरुवाच—

चतुर्मुखत्वमगमत्कस्माल्लोकपितामहः ।
कथं तु लोकानसृजद्ब्रह्मा ब्रह्मविदां वरः ॥१

मत्स्य उवाच—

तपश्चचार प्रथममराणां पितामहः ।
आविर्भूतास्ततो वेदाः साङ्गोपाङ्गपदक्रमाः ॥२

पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
नित्यं शब्दमयं पुण्यं शतकोटिप्रविस्तरम् ॥३

अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः ।
मीमांसा न्यायविद्याश्च प्रमाणाष्टकसंयुताः ॥४॥

वेदाभ्यासरतस्यास्य प्रजाकामस्य मानसाः ।
मनसः पूर्वसृष्टा वै जाता यत्तेन मानसाः ॥५

मरीचिरभवत्पूर्वं ततोऽत्रिर्भगवानृषिः ।
अङ्गिराश्चाभवत्पश्चात्पुलस्त्यस्तदनन्तरम् ॥६

ततः पुलहनामा वै ततः क्रतुरजायत ।
प्रचेताश्च ततः पुत्रो वसिष्ठश्चाभवत्पुनः ॥७

पुत्रो भृगुरभूत्तद्वन्नारदोऽप्यचिरादभूत् ।
दशेमान्मानसान्ब्रह्मा मुनीन्पुत्रानजीजनत् ॥८

शारीरानथ वक्ष्यामि मातृहीनान्प्रजापतेः ।
अङ्गुष्ठाद्दक्षिणाद्दक्षः प्रजापतिरजायत ॥९

धर्मः स्तनान्तादभवद्धृदयात्कुसुमायुधः ।
भ्रूमध्यादभवत्क्रोधो लोभश्चाधरसंभवः ॥१०

बुद्धेर्मोहः समभवदहंकारादभून्मदः ।
प्रमोदश्चाभवत्कण्ठान्मृत्युर्लोचनतो नृप ॥
भरतः करमध्यात्तु ब्रह्मसूनुरभूत्ततः ॥११

एते नव सुता राजन्कन्या च दशमो पुनः ।
अङ्गजा इति विख्याता दशमी ब्रह्मणः सुता ॥१२

× × × ×

सावित्री लोकसृष्टयर्थं हृदि कृत्वा समास्थितः ।
ततः संजपतस्तस्य भित्त्वा देहमकल्मषम् ॥३०

स्त्रीरूपमर्धमकरोदर्धं पुरुषरूपवत् ।
शतरूपा च सा ख्याता सावित्री च निगद्यते ॥३१

सरस्वत्यथ गायत्री ब्रह्माणी च परंतप ।
ततः स्वदेहसंसूतामात्मजामित्यकल्पयत् ॥३२

दृष्ट्वा तां व्यथितस्तावत्कामबाणार्दितो विभुः ।
अहो रूपमहो रूपमिति चाऽऽह प्रजापतिः ॥३३।

ततो वसिष्ठप्रमुखा भगिनीमिति चुक्रुशुः ।
ब्रह्मा न किंचिद्ददृशे तन्मुखालोकनादृते ॥३४

अहो रूपमहो रूपमिति प्राह पुनः पुनः ।
ततः प्रणामनम्रां तां पुनरेवाभ्यलोकयत् ॥३५

अथ प्रदक्षिणां चक्रे सा पितुर्वरवर्णिनी ।
पुत्रेभ्यो लज्जितस्यास्य तद्रूपालोकनेच्छया ॥३६

आविर्भूतं ततो वक्त्रं दक्षिणं पाण्डुगण्डवत् ।
विस्मयस्फुरदोष्ठं च पाश्चात्यमुदगात्ततः ॥३७

चतुर्थमभवत्पश्चाद्वामं कामशरातुरम् ।
ततोऽन्यदभवत्तस्य कामातुरतया तथा ॥३८

उत्पतन्त्यास्तदाकाश आलोकनकुतूहलात् ।
सृष्टयर्थं यत्कृतं तेन तपः परमदारुणम् ॥३९

तत्सर्वं नाशमगमत्स्वसुतोपगमेच्छया ।
तेनोर्ध्वं वक्त्रमभवत्पञ्चमं तस्य धीमतः ।
आविर्भवज्जटाभिश्च तद्वक्त्रं चाऽऽवृणोत्प्रभुः ॥४०

ततस्तानब्रवीद्ब्रह्मा पुत्रानात्मसमुद्भवान् ।
प्रजाः सृजध्वमभितः सदेवासुरमानुषीः ॥४१

एवमुक्तास्ततः सर्वे ससृजुर्विविधाः प्रजाः ।
गतेषु तेषु सृष्टयर्थं प्रणामावनतामिमाम् ॥४२

उपयेमे स विश्वात्मा शतरूपामनिन्दिताम् ।
स बभूव तया सार्धमतिकामातुरो विभुः ॥
स लज्जां चकमे देवः कमलोदरमन्दिरे ॥४३

यावदब्दशतं दिव्यं यथाऽन्यः प्राकृतो जनः ।
ततः कालेन महता तस्याः पुत्रोऽभवन्मनुः ॥४४

× × ×

अध्याय ४

मनुरुवाच—

अहो कष्टतरं चैतदङ्गजागमनं विभो ।
कथं न दोषमगमत्कर्मणाऽनेन पद्मभूः ॥१

परस्परं च सम्बन्धः सगोत्राणामभूत्कथम् ।
वैवाहिकस्तत्सुतानां छिन्धि मे संशयं विभो ॥२

मत्स्य उवाच—

दिव्येयमादिसृष्टिस्तु रजोगुणसमुद्भवा ।
अतीन्द्रियेन्द्रिया तद्वदतीन्द्रियशरीरिका ॥३

दिव्यतेजोमयी भूप दिव्यज्ञानसमुद्भवा ।
न मर्त्यैरभितः शक्या वक्तुं वै मांसचक्षुभिः ॥४

यथा भुजङ्गाः सर्पाणामाकाशं विश्वपक्षिणाम् ।
विदन्ति मार्गं दिव्यानां दिव्या एव न मानवाः ॥५

कार्याकार्ये न देवानां शुभाशुभफलप्रदे ।
यस्मात्तस्मान्न राजेन्द्र तद्विचारो नृणां शुभः ॥६

अन्यच्च सर्ववेदानामधिष्ठाता चतुर्मुखः ।
गायत्री ब्रह्मणस्तद्वदङ्गभूता निगद्यते ॥७

अमूर्तं मूर्तिमद्वाऽपि मिथुनं तत्प्रचक्षते ।
विरिञ्चिर्यत्र भगवांस्तत्र देवी सरस्वती ॥

भारती यत्र यत्रैव तत्र तत्र प्रजापतिः ॥
यथाऽऽतपो न रहितश्छायया दृश्यते क्वचित् ।
गायत्री ब्रह्मणः पार्श्वं तथैव न विमुञ्चति ॥९

वेदराशिः स्मृतो ब्रह्मा सावित्री तदधिष्ठाता ।
तस्मान्न कश्चिद्दोषः स्यात्सावित्री गमने विभोः ॥१०

तथापि लज्जावनतः प्रजापतिरभूत्पुरा ।
स्वसुतोपगमनाद्ब्रह्मा शशाप कुसुमायुधम् ॥११

यस्मान्ममाभिभवता मनः संक्षोभितं शरैः ।
तस्मात्त्वद्देहमचिराद्रुद्रो भस्मीकरिष्यति ॥१२

ततः प्रसादयामास कामदेवश्चतुर्मुखम् ।
न मामकारणे शप्तुं त्वमिहोर्हसि मानद ॥१३

अहमेवंविधः सृष्टस्त्वयैव चतुरानन ।
इन्द्रियक्षोभजनकः सर्वेषामेव देहिनाम् ॥१४

स्त्रीपुंसोरविचारेण मया सर्वत्र सर्वदा ।
क्षोभ्यं मनः प्रयत्नेन त्वयैवोक्तं पुरा विभो ॥१५

तस्मादनपराधोऽहं त्वया शप्तस्तथा विभो ।
कुरु प्रसादं भगवन्स्वशरीराप्तये पुनः ॥१६

ब्रह्मोवाच—

वैवस्वतेऽन्तरे प्राप्ते यादवान्वयसंभवः ।
रामो नाम यदा मर्त्यो मत्सत्त्वबलमाश्रितः ॥१७

अवतीर्यासुरध्वंसी द्वारकामधिवत्स्यति ।
तद्भ्रातुस्तत्समस्य त्वं तदा पुत्रत्वमेष्यति ॥१८

एवं शरीरमासाद्य भुक्त्वा भोगानशेषतः ।
ततो भरतवंशान्ते भूत्वा वत्सनृपात्मजः ॥१९

विद्याधराधिपत्यं च यावदाभूतसंप्लवम् ।
सुखानि धर्मतः प्राप्य मत्समीपं गमिष्यसि ।।२०

× × ×

या सा——गायत्री ब्रह्मवादिनी ।
जननी या मनोर्देवी शतरूपा शतेन्द्रिया ।।२४

रतिर्मनस्तपो बुद्धिर्महान्दिकसंभ्रमस्तथा ।
ततः स शतरूपायां सप्तापत्यान्यजीजनत् ।।२५

ये मरीच्यादयः पुत्रा मानसास्तस्य धीमतः ।
तेषामयमभूल्लोकः सर्वज्ञानात्मकः पुरा ।।२६

ततोऽसृजद्वामदेवं त्रिशूलवरधारिणम् ।
सनत्कुमारं च विभुं पूर्वेषामपि पूर्वजम् ।।२७

वामदेवस्तु भगवानसृजन्मुखतो द्विजान् ।
राजन्यानसृजद्बाह्वोर्विट्छूद्रानूरुपादयोः ।।२८

विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि च ।
छन्दांसि च ससर्जाऽऽदौ पर्जन्यं च ततः परम् ।।२९

ततः साध्यगणानीशस्त्रिनेत्रानसृजत्पुनः ।
कोटीश्च चतुरशीतिं जरामरणवर्जिताः ।।३०

वामोऽसृजन्नमर्त्यांस्तान्ब्रह्मणा विनिवारितः ।
नैवं विधा भवेत्सृष्टिर्जरामरणवर्जिता ।।३१

शुभाशुभात्मिका या तु सैव सृष्टिः प्रशस्यते ।
एवं स्थितः स तेनाऽऽदौ सृष्टेः स्थाणुरतोऽभवत् ।।३२

स्वायंभुवो मनुर्धीमांस्तपस्तप्त्वा सुदुश्चरम् ।
पत्नीमेवाऽऽप रूपाढ्यामनन्ता नाम नामतः ।।३३

प्रियव्रतोत्तानपादौ मनुस्तस्यामजीजनत् ।
धर्मस्य कन्या चतुरा सूनृता नाम भामिनी ।।३४

उत्तानपादात्तनयान्प्राप मन्थरगामिनी ।
अपस्यतिमपस्यन्तं कीर्तिमन्तं ध्रुवं तथा ।।३५

उत्तानपादोऽजनयत्सूनृतायां प्रजापतिः ।
ध्रुवो वर्षसहस्राणि त्रीणि कृत्वा तपः पुरा ॥३६

दिव्यमाप ततः स्थानमचलं ब्रह्मणो वरात् ।
तमेव पुरतः कृत्वा ध्रुवं सप्तर्षयः स्थिताः ॥३७

धन्या नाम मनोः कन्या ध्रुवाच्छिष्टमजीजनत् ।
अग्निकन्या तु सुच्छाया शिष्टात्सा सुषुवे सुतान् ॥३८

कृपं रिपुं जयं वृत्तं वृकं च वृकतेजसम् ।
चक्षुषं ब्रह्मदौहित्र्यां वीरिण्यां स रिपुञ्जयः ॥३९

वीरणस्याऽऽत्मजायां तु चक्षुर्मनुमजीजनत् ।
मनुर्वै राजकन्यायां नड्वलायां स चाक्षुषः ॥४०

जनयामास तनयान्दश शूरानकल्मषान् ।
ऊरुः पूरुः शतद्युम्नस्तपस्वी सत्यवागघविः ॥४१

अग्निष्टुदतिरात्रश्च सुद्युम्नश्चापराजितः ।
अभिमन्युस्तु दशमो नड्वलायामजायत ॥४२

ऊरोरजनयत्पुत्रान्षडाग्नेयी तु सुप्रभान् ।
अंगिं सुमनसं ख्यातिं क्रतुमङ्गिरसं गयम् ॥४३

पितृकन्या सुनीथा तु वेनमङ्गादजीजनत् ।
वेनमन्यायिनं विप्रा ममन्थुस्तत्करादभूत् ॥
पृथुर्नाम महातेजाः स पुत्रौ द्वावजीजनत् ॥४४

अन्तर्धानस्तु मारीचं शिखण्डिन्यामजीजनत् ।
हविर्धानात्षडाग्नेयी धिषणाऽजनयत्सुतान् ।
प्राचीनबर्हिषं साङ्गं यमं शुक्रं बलं शुभम् ॥४५

प्राचीनबर्हिर्भगवान्महानासीत्प्रजापतिः ।
हविर्धानाः प्रजास्तेन बहवः संप्रवर्तिताः ॥४६

सवर्णायां तु सामुद्र्यां दशाऽऽधत्त सुतान्प्रभुः ।
सर्वे प्रचेतसो नाम धनुर्वेदस्य पारगाः ॥४७

× × ×

जनयामास धर्मात्मा म्लेच्छान्सर्वाननेकशः ।
स दृष्ट्वा मनसा दक्षः स्त्रियः पश्चादजीजनत् ॥५४

ददौ स दश धर्माय कश्यपाय त्रयोदश ।
सप्तविंशति सोमाय ददौ नक्षत्रसंज्ञिताः ॥
देवासुरमनुष्यादि ताभ्यः सर्वमभूज्जगत् ॥५५

अध्याय १५४

सूत उवाच—

× × ×

जग्मुर्जगद्गुरुं द्रष्टुं शरणं कमलोद्भवम् ।
निवेदितास्ते शक्राद्याः शिरोभिर्धरणिं गताः ॥
तुष्टुवुः स्पष्टवर्णार्थैर्वचोभिः कमलासनम् ॥६

देवा ऊचुः—

त्वमोंकारोऽस्यङ्कुराय प्रसूतो विश्वस्याऽऽत्माऽनन्तभेदस्य पूर्वम् ।
संभूतस्यानन्तरं सत्त्वमूर्ते संहारेच्छोस्ते नमो रुद्रमूर्ते ॥

व्यक्ति नीत्वा त्वं वपुः स्वं महिम्ना तस्मादण्डात्स्वाभिधानादचिन्त्यः ।
द्यावापृथ्व्योरूर्ध्वखण्डावराभ्यां ह्यण्डादस्मात्त्वं विभागं करोषि ॥८

व्यक्तं मेरौ यज्जनायुस्तवाभूदेवं विद्मस्त्वत्प्रणीतश्चकास्ति ।
व्यक्तं देवाजन्मनः शाश्वतस्य द्यौस्ते मूर्धा लोचने चन्द्रसूर्यौ ॥९

व्यालाः केशाः श्रोत्ररन्ध्रा दिशस्ते पादौ भूमिर्नाभिरन्ध्रे समुद्राः ।
मायाकारः कारणं त्वं प्रसिद्धो वेदैः शान्तो ज्योतिषा त्वं विमुक्तः ॥१०

वेदार्थेषु त्वां विवृण्वन्ति बुद्ध्वा हृत्पद्मान्तः सन्निविष्टं पुराणम् ।
त्वामात्मानं लब्धयोगा गृणन्ति सांख्यैर्यास्ताः सप्त सूक्ष्माः प्रणीताः ॥११

तासां हेतुर्याऽष्टमी चापि गीता तस्यां गीयसे वै त्वमन्तम् ।
दृष्ट्वा मूर्ति स्थूलसूक्ष्मां चकार देवैर्भावाः कारणैः कैश्चिदुक्ताः ॥१२

संभूतास्ते त्वत्त एवाऽऽदिसर्गे भूयस्तां तां वासनां तेऽभ्युपेयुः ।
त्वत्संकल्पेनान्तमायाभिगूढः कालो मेयो ध्वस्तसंख्याविकल्पः ॥१३

भावाभावव्यक्तिसंहारहेतुस्त्वं सोऽनन्तस्तस्य कर्त्तासि चाऽऽत्मन् ।
येऽन्ये सूक्ष्माः सन्ति तेभ्योऽभिगीतः स्थूला भावाश्चाऽऽवृतारश्च तेषाम् ॥१४

तेभ्यः स्थूलैस्तैः पुराणैः प्रतीतो भूतं भव्यं चैवमुद्भूतिभाजाम् ।
भावे भावे भावितं त्वा युनक्ति युक्तं युक्तं व्यक्तिभावान्निरस्य ॥
इत्थं देवो भक्तिभाजां शरण्यस्त्राता गोप्ता नो भवानन्तमूर्तिः ॥१५

विरेमुरमराः स्तुत्वा ब्रह्माणमविकारिणम् ।
तस्थुर्मनोभिरिष्टार्थसंप्राप्तिप्रार्थनास्ततः ॥१६

एवं स्तुतो विरिञ्चिस्तु प्रसादं परमं गतः ।
अमरान्वरदेनाऽऽह वामहस्तेन निर्दिशन् ॥१७

ब्रह्मोवाच—

नारी याऽभर्तृकाऽकस्मात्तनुरते त्यक्तभूषणा ।
न राजते तथा शक्र म्लानवक्त्रशिरोरुहा ॥१८

हुताशनविमुक्तोऽपि न धूमेन विराजसे ।
भस्मनेव प्रतिच्छन्नो दग्धदावश्चिरोषितः ॥१९

यमाऽऽमयमये नैव शरीरे त्वं विराजसे ।
दण्डस्याऽऽलम्बनेनेव ह्याक्रन्दन्नरस्तु पदे पदे ॥२०

रजनीचरनाथोऽपि किं भीत इव भाषसे ।
राक्षसेन्द्र क्षताराते त्वमरातिक्षतो यथा ॥२१

तनुस्ते वरुणोच्छुष्का परीतस्येव वह्निना ।
विमुक्तरुधिरं पाशं फणिभिः प्रविलोकयन् ॥२२

वायो भवान्विचेतस्कस्त्वं स्निग्धैरिव निर्जितः ।
किं त्वं बिभेषि धनद संन्यस्यैव कुबेरताम् ॥२३

रुद्रास्त्रिशूलिनः सन्तो वदध्वं बहुशूलताम् ।
भवन्तः केन तत्क्षिप्तं तेजस्तु भवतामपि ॥२४

अकिंचित्करतां यातः करस्ते न विभाससे ।
अलं नीलोत्पलाभेन चक्रेण मधुसूदन ॥२५

किं त्वयाऽनुदारालीनभुवनप्रविलोकनम् ।
क्रियते स्तिमिताक्षेण भवता विश्वतोमुख ॥२६

एवमुक्ताः सुरास्तेन ब्रह्मणा ब्रह्ममूर्तिना ।
वाचां प्रधानभूतत्वान्मारुतं तमचोदयन् ॥२७

अथ विष्णुमुखैर्देवैः श्वसनः प्रतिबोधितः ।
चतुर्मुखं तथा प्राह चराचरगुरुं विभुम् ॥२८

न तु वेत्सि चराचरभूतगतं भवभावमतीव महानुच्छ्रितः प्रभवः ।
पुनरर्थिवचोऽभिविस्तृतश्रवणोपमकौतुकभावकृतः ॥२९

त्वमनन्त करोषि जगद्भवतां सचराचरगर्भविभिन्नगुणाम् ।
अमरासुरमेतदशेषमपि त्वयि तुल्यमहो जनकोऽसि यतः ॥३०

पितुरस्ति तथाऽपि मनोविकृतिः सगुणो विगुणो बलवानबलः ।
भवतो वरलाभनिवृत्तभयः कुलिशाङ्गसुतो दितिजोऽतिबलः ॥३१

सचराचरनिर्मथने किमिति कितवस्तु कृतो विहितो भवता ।
किल देव त्वया स्थितये जगतां महदद्भुतचित्रविचित्रगुणाः ॥३२

अपि तुष्टिकृतः श्रुतकामफला विहिता द्विजनायक देवगणाः ।
अपि नाकमभूत्किल यज्ञभुजां भवतो विनियोगवशात्सततम् ॥३३

अपहृत्य विमानगणं स कृतो दितिजेन महामरुभूमिसमः ।
कृतवानसि सर्वगुणातिशयं यमशेषमहीधरराजतया ॥३४

सममिङ्गितभावविधिः स गिरिर्गगनेन सदोच्छ्रयतां हि गतः ।
अधिवासविहारविधावुचितो दितिजेन पविक्षतशृङ्गतटः ॥३५

परिलुण्ठितरत्नगुहानिवहो बहुदैत्यसमाश्रयतां गमितः ।
सुरराज स तस्य भयेन गतं व्यदधादशरीर इतोऽपि वृथा ॥३६

उपयोग्यतया विवृतं सुचिरं विमलद्युतिपूरितदिग्वदनम् ।
भवतैव विनिर्मितमादियुगे सुरहेतिसमूहमनुत्थमिदम् ॥३७

दितिजस्य शरीरमवाप्य गतं शतधा मतिभेदमिवात्म्पमनाः ।

आसारधूलिध्वस्ताङ्गा द्वारस्थाः स्मः कर्दथिनः ।
लब्धप्रवेशाः कृच्छ्रेण वयं तस्यामरद्विषः ॥३८

× × ×

इति निःशेषमथवा निःशेषं वै न शक्यते ।
तस्याविनयमाख्यातुं स्रष्टा तत्र परायणम् ॥४५

इत्युक्तः स्वात्मभूर्देवः सुरैर्दैत्यविचेष्टितम् ।
सुरानुवाच भगवांस्ततः स्मितमुखाम्बुजः ॥४६

ब्रह्मोवाच—

अवध्यस्तारको दैत्यः सर्वैरपि सुरासुरैः ।
यस्य वध्यः स नाद्यापि जातस्त्रिभुवने पुमान् ॥४७

मया स वरदानेन च्छन्दयित्वा निवारितः ।
तपसः सांप्रतं राजा त्रैलोक्यदहनात्मकात् ॥४८

स च वव्रे वधं दैत्यः शिशुतः सप्तवासरात् ।
स सप्तदिवसो बालः शंकराद्यो भविष्यति ॥४९

तारकस्य निहन्ता स भास्कराभो भविष्यति ।
सांप्रतं चाप्यपत्नीकः शंकरो भगवान्प्रभुः ॥५०

यच्चाहमुक्तवान्यस्या ह्युत्तानकरता सदा ।
उत्तानो वरदः पाणिरेषो देव्याः सदैव तु ॥५१

हिमाचलस्य दुहिता सा तु देवी भविष्यति ।
तस्याः सकाशाद्यः शर्वस्त्वरण्यां पावको यथा ॥५२

जनयिष्यति तं प्राप्य तारकोऽभिभविष्यति ।
मयाऽप्युपायः स कृतो यथैवं हि भविष्यति ॥५३

शेषश्चाप्यस्य विभवो विनश्येत्तदनन्तरम् ।
स्तोककालं प्रतीक्षध्वं निर्विशङ्केन चेतसा ॥५४

इत्युक्तास्त्रिदशास्तेन साक्षात्कमलजन्मना ।
जग्मुस्तं प्रणिपत्येशं यथायोगं दिवौकसः ॥५५

× × ×

ततो भगवती रात्रिरुपतस्थे पितामहम् ।
तां विविक्ते समालोक्य ब्रह्मोवाच विभावरीम् ॥५७

ब्रह्मोवाच—

विभावरि महत्कार्यं विबुधानामुपस्थितम् ।
तत्कर्तव्यं त्वया देवि शृणु कार्यस्य निश्चयम् ॥५८

तारको नाम दैत्येन्द्रः सुरकेतुरनिर्जितः ।
तस्याभावाय भगवाञ्जनयिष्यति चेश्वरः ॥५९

सुतं स भविता तस्य तारकस्यान्तकारकः ।
शंकरस्याभवत्पत्नी सती दक्षसुता तु या ॥६०

सा मृता कुपिता देवी कस्मिंश्चित्कारणान्तरे ।
भविता हिमशैलस्य दुहिता लोकभाविनी ॥६१

विरहेण हरस्तस्या मत्वा शून्यं जगत्त्रयम् ।
तपस्यन्हिमशैलस्य कन्दरे सिद्धसेविते ॥६२

प्रतीक्षमाणस्तज्जन्म कंचित्कालं निवत्स्यति ।
तयोः सुतप्ततपसोर्भविता यो महाबलः ॥६३

स भविष्यति दैत्यस्य तारकस्य विनाशकः ।
जातमात्रा तु सा देवी स्वल्पसंज्ञा च भामिनी ॥६४

विरहोत्कण्ठिता गाढं हरसङ्गमलालसा ।
तयोः सुतप्ततपसोः संयोगः स्याच्छुभानने ॥६५
ततस्ताभ्यां तु जनितः स्वल्पो वाक्कलहो भवेत् ।
ततोऽपि संशयो भूयस्तारकं प्रति दृश्यते ॥६६

तयोः संयुक्तयोस्तस्मात्सुरतासक्तिकारणे ।
विघ्नस्त्वया विधातव्यो यथा ताभ्यां तथा शृणु ॥६७

गर्भस्थाने च तन्मातुः स्वेन रूपेण रञ्जय ।
ततो विहाय शर्वस्तां विश्रान्तो नर्मपूर्वकम् ॥६८

भर्त्सयिष्यति तां देवीं ततः सा कुपिता सती ।
प्रयास्यति तपश्चर्तुं तत्तस्मात्तपसे पुनः ॥६९

जनयिष्यति यं शर्वादमितद्युतिमण्डितम् ।
स भविष्यति हन्ता वै सुरारीणामसंशयम् ॥७०

त्वयाऽपि दानवा देवि हन्तव्या लोकदुर्जयाः ।
यावच्च न सती देहसंक्रान्तगुणसंचया ॥७१

तत्संगमेन तावत्त्वं दैत्यान्हन्तुं न शक्ष्यसे ।
एवं कृते तपस्तप्त्वा सृष्टिसंहारकारिणी ॥७१

× × ×

अध्याय १६१

Hiraṇyakaśyapa practises penances and obtains many boons from Brahmā. The gods come to Brahmā hearing the terrific boons acquired by Hiraṇyakaśyapa. Brahmā says that Hiraṇyakaśyapa will be killed by Viṣṇu at the end of the penances......

ऋषय ऊचुः—

इदानीं श्रोतुमिच्छामो हिरण्यकशिपोर्वधम् ।
नरसिंहस्य माहात्म्यं तथा पापविनाशनम् ॥१

सूत उवाच—

पुरा कृतयुगे विप्रा हिरण्यकशिपुः प्रभुः ।
दैत्यानामादिपुरुषश्चकार स महत्तपः ॥२

दश वर्षसहस्राणि दश वर्षशतानि च ।
जलवासी समभवत्स्नानमौनधृतव्रतः ॥३

ततः शमदमाभ्यां च ब्रह्मचर्येण चैव हि ।
ब्रह्मा प्रीतोऽभवत्तस्य तपसा नियमेन च ॥४

ततः स्वयंभूर्भगवान्स्वयमागम्य तत्र ह ।
विमानेनार्कवर्णेन हंसयुक्तेन भास्वता ॥५

आदित्यैर्वसुभिः साध्यैर्मरुद्भिर्दैवतैस्तथा ।
रुद्रैर्विश्वसहायैश्च यक्षराक्षसपन्नगैः ॥६

दिग्भिश्चैव विदिग्भिश्चैव नदीभिः सागरैस्तथा ।
नक्षत्रैश्च मुहूर्तैश्च खेचरैश्च महाग्रहैः ॥७

देवैर्ब्रह्मर्षिभिः सार्धं सिद्धैः सप्तर्षिभिस्तथा ।
राजर्षिभिः पुण्यकृद्भिर्गन्धर्वाप्सरसां गणैः ॥८

चराचरगुरुः श्रीमान्वृतः सर्वैर्दिवौकसैः ।
ब्रह्मा ब्रह्मविदां श्रेष्ठो दैत्यं वचनमब्रवीत् ॥६

प्रीतोऽस्मि तव भक्तस्य तपसाऽनेन सुव्रत ।
वरं वरय भद्रं ते यथेष्टं काममाप्नुहि ॥१०

हिरण्यकशिपुरुवाच—

न देवासुरगन्धर्वा न यक्षोरगराक्षसाः ।
न मानुषाः पिशाचा वा हन्युर्मां देवसत्तम ॥११

ऋषयो वा न मां शापैः शपेयुः प्रपितामह ।
यदि मे भगवान्प्रीतो वर एष वृतो मया ॥१२

न चास्त्रेण न शस्त्रेण गिरिणा पादपेन च ।
न शुष्केण न चाऽऽर्द्रेण न दिवा न निशाथ वा ॥१३

भवेयमहमेवार्कः सोमो वायुर्हुताशनः ।
सलिलं चान्तरिक्षं च नक्षत्राणि दिशो दश ॥१४

अहं क्रोधश्च कामश्च वरुणो वासवो यमः ।
धनदश्च धनाध्यक्षो यक्षः किंपुरुषाधिपः ॥१५

ब्रह्मोवाच—

एते दिव्या वरास्तात मया दत्तास्तवाद्भुताः ।
सर्वान्कामान्सदा वत्स प्राप्स्यसि त्वं न संशयः ॥१६

एवमुक्त्वा स भगवाञ्जगामाऽऽकाश एव हि ।
वैराजं ब्रह्मसदनं ब्रह्मर्षिगणसेवितम् ॥१७
ततो देवाश्च नागाश्च गन्धर्वा ऋषिभिः सह ।
वरप्रदानं श्रुत्वैव पितामहमुपस्थिताः ॥१८

देवा ऊचुः—

वरप्रदानाद्भगवन्वधिष्यति स नोऽसुरः ।
तत्प्रसीदाऽऽशु भगवन्वधोऽप्यस्य विचिन्त्यताम् ॥१६

भगवन्सर्वभूतानामादिकर्ता स्वयं प्रभुः ।
स्रष्टा त्वं हव्यकव्यानामव्यक्तप्रकृतिर्बुधः ॥२०

सर्वलोकहितं वाक्यं श्रुत्वा देवः प्रजापतिः ।
आश्वासयामास सुरान्सुशीतैर्वचनाम्बुभिः ॥२१

अवश्यं त्रिदशास्तेन प्राप्तव्यं तपसः फलम् ।
तपसोऽन्तेऽस्य भगवान्वधं विष्णुः करिष्यति ॥२२

तच्छ्रुत्वा विबुधा वाक्यं सर्वे पङ्कजजन्मनः ।
स्वानि स्थानानि दिव्यानि विप्रजग्मुर्मुदाऽन्विताः ॥२३

लब्धमात्रे वरे चाथ सर्वाः सोऽबाधत प्रजाः ।
हिरण्यकशिपुर्दैत्यो वरदानेन दर्पितः ॥२४

आश्रमेषु महाभागान्स मुनीञ्छंसितव्रतान् ।
सत्यधर्मपरान्दान्तान्धर्षयामास दानवः ॥२५

× × ×

शरण्यं शरणं विष्णुमुपतस्थुर्महाबलम् ।
देवदेवं यज्ञमयं वासुदेवं सनातनम् ॥२९

देवा ऊचुः—

नारायण महाभाग देवास्त्वां शरणं गताः ।
त्रायस्व जहि दैत्येन्द्रं हिरण्यकशिपुं प्रभो ॥३०

× × ×

अध्याय १७०

When Brahmā was practising penances in the Lotus, Madhu and Kaitabha tried to disturb him The Lord taking them on his thigh, crushed them.

मत्स्य उवाच—

विघ्नस्तपसि संभूतो मधुर्नाम महासुरः ।
तेनैव च सहोद्भूतो ह्यसुरो नाम कैटभः ॥१

तौ रजस्तमसौ विष्णोः संभूतौ तामसौ गुणौ ।
एकार्णवे जगत्सर्वं क्षोभयन्तौ महाबलौ ॥२

दिव्यरक्ताम्बरधरौ श्वेतदीप्तोग्रदंष्ट्रिणौ ।
किरीटकुण्डलोदग्रौ केयूरवलयोज्ज्वलौ ॥३

× × ×

ततस्तावूचतुस्तत्र ब्रह्माणमसुरोत्तमौ ।
दीप्तौ मुमूर्षू संक्रुद्धौ रोषव्याकुलितेक्षणौ ॥९

कस्त्वं पुष्करमध्यस्थः सितोष्णीषश्चतुर्मुखः ।
आधाय नियमं मोहादास्से त्वं विगतज्वरः ॥१०

एह्यागच्छाऽऽवयोर्युद्धं देहि त्वं कमलोद्भव ।
आवाभ्यां परमीशाभ्यामशक्तस्त्वमिहार्णवे ॥११

तत्र कश्चोद्भवस्तुभ्यं केन वाऽसि न योजितः ।
कः स्रष्टा कश्च ते गोप्ता केन नाम्ना विधीयसे ॥१२

ब्रह्मोवाच—

एक इत्युच्यते लोकैरविचिन्त्यः सहस्रदृक् ।
तत्संयोगेन भवतोः कर्म नामावगच्छताम् ॥१३

मधुकैटभावूचतुः—

नाऽऽवयोः परमं लोके किञ्चिदस्ति महामते ।
आवाभ्यां छाद्यते विश्वं तमसा रजसाऽथ वै ॥१४

रजस्तमोमयावावामृषीणामवलङ्घितौ ।
छाद्यमानौ धर्मशीलौ दुस्तरौ सर्वदेहिनाम् ॥१५

आवाभ्यामुह्यते लोको दुष्कराभ्यां युगे युगे ।
आवामर्थश्च कामश्च यज्ञः स्वर्गपरिग्रहः ॥१६

सुखं यत्र मुदा युक्तं यत्र श्रीः कीर्तिरेव च ।
येषां यत्काङ्क्षितं चैव तत्तदावां विचिन्तय ॥१७

ब्रह्मोवाच—

यत्नाद्योगवतो दृष्ट्या योगः पूर्वं मयार्ऽजितः ।
तं समाश्राय गुणवतसत्वं चास्मि समाश्रितः ।।१८

यः परो योगमतिमान्योगाख्यः सत्त्वमेव च ।
रजसस्तमसश्चैव यः स्रष्टा विश्वसंभवः ।।१९

ततो भूतानि जायन्ते सात्त्विकानीतराणि च ।
स एव हि युवां नाशे वशी देवो हनिष्यति ।।२०

स्वपन्नेव ततः श्रीमान्बहुयोजनविस्तृतम् ।
बाहुं नारायणो ब्रह्मा कृतवानात्ममायया ।।२१

कृष्यमाणौ ततस्तस्य बाहुना बाहुशालिनः ।
चरेतुस्तौ विगलितौ शकुनाविव पीवरौ ।।२२

× × ×

अध्याय १७१

मत्स्य उवाच—

स्थित्वा च तस्मिन्कमले ब्रह्मा ब्रह्मविदां वरः ।
ऊर्ध्वबाहुर्महातेजास्तपो घोरं समाश्रितः ।।१
प्रज्वलन्निव तेजोभिर्भाभिः स्वाभिस्तमोनुदः
बभासे सर्वधर्मस्थः सहस्रांशुरिवांशुभिः ।।२

अथान्यद्रूपमास्थाय शंभुर्नारायणोऽव्ययः ।
आजगाम महातेजा योगाचार्यो महायशाः ।।३

सांख्याचार्यो हि मतिमान्कपिलो ब्राह्मणो वरः ।
उभावपि महात्मानौ स्तुवन्तौ क्षेत्रतत्परौ ।।४

तौ प्राप्तावूचतुस्तत्र ब्रह्माणममितौजसम् ।
परावरविशेषज्ञौ पूजितौ च महर्षिभिः ।।५

ब्रह्मात्मदृढबन्धश्च विशालो जगदास्थितः ।
ग्रामणीः सर्वभूतानां ब्रह्मा त्रैलोक्यपूजितः ।।६

तयोस्तद्वचनं श्रुत्वा ब्रह्माऽभ्याहृतयोगवित् ।
त्रीनिमान्कृतवाँल्लोकान्ययेयं ब्रह्मणः श्रुतिः ॥७

पुत्रं च शंभवे चैकं समुत्पादितवानृषिः ।
तस्याग्रे वाग्यतस्तस्थौ ब्रह्मा तामसमव्ययम् ॥८

सोत्पन्नमात्रो ब्रह्माणमुक्तवान्मानसः सुतः ।
किं कुर्मस्तव साहाय्यं ब्रवीतु भगवानृषिः ॥९

ब्रह्मोवाच—

य एष कपिलो ब्रह्म नारायणमयस्तथा ।
वदते भवतस्तत्त्वं तत्कुरुध्व महामते ॥१०

ब्रह्मणस्तु तदर्थं तु तदा भूयः समुस्थितः ।
शुश्रूषुरस्मि युवयोः किं करोमि कृताञ्जलिः ॥११

श्रीभगवानुवाच—

यत्सत्यमक्षरं ब्रह्म ह्यष्टादशविधं तु तत् ।
यत्सत्यं यदृतं तत्तु परं पदमनुस्मर ॥१२

एतद्वचो निशम्यैव ययौ स दिशमुत्तराम् ।
गत्वा च तत्र ब्रह्मत्वमगमज्ज्ञानतेजसा ॥१३

ततो ब्रह्मा भुवं नाम द्वितीयमसृजत्प्रभुः ।
संकल्पयित्वा मनसा तमेव च महामनाः ॥१४

ततः सोऽथाब्रवीद्वाक्यं किं करोमि पितामह ।
पितामहसमाज्ञातो ब्रह्माणं समुपस्थितः ॥१५

ब्रह्माभ्यासं तु कृतवान्भुवश्च पृथिवीं गतः ।
प्राप्तश्च परमं स्थानं स तयोः पार्श्वमागतः ॥१६

तस्मिन्नपि गते पुत्रे तृतीयमसृजत्प्रभुः ।
मोक्षप्रवृत्तिकुशलं भूर्भुवं नामतो विभुम् ॥१७

गोपतित्वं समासाद्य तयोरेवागमद्गतिम् ।
एवं पुत्रास्त्रयोऽप्येत उक्ताः शंभोर्महात्मनः ॥१८

तान्गृहीत्वा सुतांस्तस्य प्रयातः स्वार्जितां गतिम् ।
नारायणश्च भगवान्कपिलश्च यतीश्वरः ॥१९

यं कालं ततो गतौ मुक्तौ ब्रह्मा तं कालमेव हि ।
ततो घोरतमं भूयः संश्रितः परमं व्रतम् ॥२०

न रेमेऽथ ततो ब्रह्मा प्रभुरेकस्तपश्चरन् ।
शरीरार्धात्ततो भार्यां समुत्पादितवाञ्छुभाम् ॥२१

तपसा तेजसा चैव वर्चसा नियमेन च ।
सदृशीमात्मनो देवीं समर्थां लोकसर्जने ॥२२

तया समाहितस्तत्र रेमे ब्रह्मा तपश्चरन् ।
ततो जगाद त्रिपदां गायत्रीं वेदपूजिताम् ॥२३

सृजन्प्रजानां पतयः (?) सागरांश्चासृजद्विभुः ।
अपरांश्चैव चतुरो वेदान्गायत्रिसंभवान् ॥२४

आत्मनः सदृशान्पुत्रानसृजद्वै पितामहः ।
विश्वे प्रजानां पतयो येभ्यो लोका विनिःसृताः ॥२५

विश्वेशं प्रथमं तावन्महातापसमात्मजम् ।
सर्वमन्त्रहितं पुण्यं नाम्ना धर्मं स सृष्टवान् ॥२६

दक्षं मरीचिमत्रिं च पुलस्त्यं पुलहं क्रतुम् ।
वसिष्ठं गौतमं चैव भृगुमङ्गिरसं मनुम् ॥२७

अथैवाद्भुतमित्येते ज्ञेयाः पैतामहर्षयः ।
त्रयोदशगुणं धर्ममालभन्त महर्षयः ॥२८

अदितिर्दितिर्दनुः काला अनायुः सिंहिका मुनिः ।
ताम्रा क्रोधाऽथ सुरता विनता कद्रुरेव च ॥२९

दक्षस्यापत्यमेता वै कन्या द्वादश पार्थिव ।
मरीचेः कश्यपः पुत्रस्तपसा निर्मितः किल ॥३०

तस्मै कन्या द्वादशान्या दक्षस्ताः प्रददौ तदा ।
नक्षत्राणि च सोमाय तदा वै दत्तवानृषिः ॥३१

रोहिण्यादीनि सर्वाणि पुण्यानि रविनन्दन ।
लक्ष्मीर्मरुत्वती साध्या विश्वेशा च मता शुभा ॥३२

देवी सरस्वती चैव ब्रह्मणा निर्मिताः पुरा ।
एताः पञ्च वरिष्ठा वै सुरश्रेष्ठाय पार्थिव ॥३३

दत्ता भद्राय धर्माय ब्रह्मणा दृष्टकर्मणा ।
या तु रूपवती पत्नी ब्रह्मणः कामरूपिणी ॥३४

सुरभिः सा हिता भूत्वा ब्रह्माणं समुपस्थिता ।
ततस्तामगमद्‌ब्रह्मा मैथुनं लोकपूजितः ॥३५

लोकसर्जनहेतुज्ञो गवामर्थाय सत्तमः ।
जज्ञिरे च सुतास्तस्यां विपुला धूमसन्निभाः ॥३६

नक्तसंध्याभ्रसंकाशाः प्रादहंस्तिग्मतेजसः ।
ते रुदन्तो द्रवन्तश्च गर्हयन्तः पितामहम् ॥३७

रोदनाद्द्रवणाच्चैव रुद्रा इति ततः स्मृताः ।
निर्ऋतिश्चैव शंभुर्वै तृतीयश्चापराजितः ॥३८

× × ×

इन्द्रो विष्णुर्भगस्त्वष्टा वरुणो ह्यर्यमा रविः ।
पूषा मित्रश्च धनदो धाता पर्जन्य एव च ॥५६

इत्येते द्वादशाऽऽदित्या वरिष्ठास्त्रिदिवौकसः ।
आदित्यस्य सरस्वत्यां जज्ञाते द्वौ सुतौ वरौ ॥५७

तपःश्रेष्ठौ गुणश्रेष्ठौ त्रिदिवस्यापि संमतौ ।
दनुस्तु दानवाञ्जज्ञे दितिर्दैत्यान्व्यजायत ॥५८

× × ×

अध्यया २६०

ब्रह्मा कमण्डलुधर: कर्तव्यः स चतुर्मुखः ।
हंसारूढः क्वचित्कार्यः क्वचिच्च कमलासनः ।।४०

वर्णतः पद्मगर्भाभश्चतुर्बाहुः शुभेक्षणः ।
कमण्डलुं वामकरे स्रुवं हस्ते तु दक्षिणे ।।४१

वामे दण्डधरं तद्वत्स्रुवं चापि प्रदर्शयेत् ।
मुनिभिर्देवगन्धर्वैः स्तूयमानं समन्ततः ।।४२

कुर्वाणमिव लोकांस्त्रीञ्छुक्लाम्बरधरं विभुम् ।
मृगचर्मधरं चापि दिव्ययज्ञोपवीतिनम् ।।४३

आज्यस्थालीं न्यसेत्पार्श्वे वेदांश्च चतुरः पुनः ।
वामपार्श्वेऽस्य सावित्रीं दक्षिणे च सरस्वतीम् ।।४४
अग्रे च ऋषयस्तद्वत्कार्याः पैतामहे पदे ।।४५ पूर्वार्ध।।

See other references (*MP.*,) :

Origin of Tripura in the story of Tripura. Māyā gets a boon from Brahmā (Chapter. 129) ; Tāraka gets the boon. Preparation for a war between the gods and demons. A discourse between Brahmā and Tāraka; Brahmā offers a boon to Tāraka. (Chapt. 148). Indra and the other gods praise Brahmā. Brahmā has a discourse with Vāyu (Chapt. 154); Adi dies. Brahmā gives a boon to Ādi (Chapt. 156); Brahmā gives boon to Umā Devi (Chapt. 167); The lion praised by Brahmā and others (Chapt. 168). On this vast ocean, Nārāyaṇa took the form of a swan and from crane and others, he created Brahmā (Chapt. 167). Great war between gods and demons. Praise of celibacy. Durva gets a boon from Brahmā. Armed with this, Durva creats an illusion to help the army of Māyā and crush that of the gods. Indra requests Brahmā to quench the illusory fire of Durva and also requests the moon born on the ocean to do the likewise (Chapt. 175). Brahmā praises Viṣṇu. Viṣṇu reinstates the gods in their former possessions and returns to his own abode along with Brahmā (Chapt. 178); The re-birth of Brahmā etc., (Chapt. 195).

5. विष्णुधर्मोत्तरपुराणम्

अध्याय ४४

वज्रः—

देवतारूपनिर्माणं कथयस्व ममानघ ।
यस्मात्सन्निहिता नित्यं शास्त्रवत् साकृताभ (?तिर्भ) वेत् ॥१

मार्कण्डेयः—

देवतारूपनिर्माणं वदतः शृणु पार्थिव ।
आदावेव प्रवक्ष्यामि त्रिमूर्तेस्तव पार्थिव ॥२

विष्णोरमितवीर्यस्य प्रतिमालक्षणं शुभम् ।
ब्राह्मी तु राजसी मूर्तिस्तस्य सर्वप्रवर्तिनी ॥३

× × ×

ब्रह्माणं कारयेद्विद्वान्देवं सौम्यं चतुर्मखम् ।
बद्धपद्मासनं तोष्यं तथा कृष्णाजिनाम्बरम् ॥५

जटाधरं चतुर्बाहुं सप्तहंसे रथे स्थितम् ।
वामे न्यस्तं करतले तस्यैकं दोर्युगं भवेत् ॥६

एकस्मिन्दक्षिणे पाणावक्षमाला तथा शुभा ।
कमण्डलुर्द्वितीये च सर्वाभरणधारिणः ॥७
सर्वलक्षणयुक्तस्य शान्तरूपस्य पार्थिव ।
पद्मपत्रदलाग्राभं ध्यानसंमीलितेक्षणम् ॥८
अर्चायां कारयेद्देवं चित्रे वा पुस्तकर्मणि ॥९

× × ×

अध्याय ४६

वज्रः—

रूपगन्धरसैर्हीनः शब्दस्पर्शविवर्जितः ।
पुरुषस्तु त्वया प्रोक्तस्तस्य रूपमिदं कथम् ॥१

मार्कण्डेयः—

प्रकृतिर्विकृतिस्तस्य द्वे रूपे परमात्मनः ।
अलक्ष्यं तस्य तद्रूपं प्रकृतिः सा प्रकीर्तिता ॥२

साकारा विकृतिर्ज्ञेया तस्य सर्वं जगत्स्मृतम् ।
पूजाध्यानादिकं कर्त्तुं साकारस्यैव शक्यते ॥३

स्वतस्तु देवः साकारः पूजनीयो यथाविधि ।
अव्यक्ता हि गतिर्दुःखं देहभृद्भिरवाप्यते ॥४

अतो भगवतानेन स्वेच्छया यत्प्रदर्शितम् ।
प्रादुर्भावेष्वथाकारं तदर्चन्ति दिवौकसः ॥५

एतस्मात्कारणात्पूजा साकारस्य विधीयते ।
हेतुमच्च तदाकारं तन्मे निगदतः शृणु ॥६

अरुणं रजसो वर्णं तेन पद्मागसन्निभः ।
ब्रह्मा देववरो ज्ञेयः सर्वभूतनमस्कृतः ॥७

ऋग्वेदः पूर्ववदनं यजुर्वेदस्तु दक्षिणम् ।
पश्चिमं सामवेदः स्यादथर्वणमथोत्तरम् ॥८

ये वेदास्ते मुखा ज्ञेयाश्चतस्रो बाहवो दिशः ।
आप एव जगत्सर्वं स्थावरं जङ्गमं तथा ॥९

ताश्च धारयते ब्रह्मा तेन हस्ते कमण्डलुः ।
अक्षमाला विनिर्दिष्टा कालस्तु ब्रह्मणः करे ॥१०

कलनात्सर्वभूतानां काल इत्यभिधीयते ।
यज्ञं वितन्वते सन्तः शुक्लाशुक्लेन कर्मणा ॥११

शुक्लाशुक्लमतो ज्ञेयं वासः कृष्णाजिनं विभोः ।
भूर्लोकश्च भुवो लोकः स्वर्लोकोऽथ महत्तथा ॥१२

जनस्तपश्च सत्यं च सप्त लोकाः प्रकीर्तिताः ।
ये लोकास्ते रथे हंसा ब्रह्मणः परमेष्ठिनः ॥१३

विष्णुनाभौ समुत्पन्नं यत्पद्मं सा मही द्विज ।
मेरुस्तु कर्णिका तस्य विज्ञेया राजसत्तम ॥१४

सर्वत्र पार्थिवस्थैर्यं ध्यानबन्धमतः स्थितम् ।
पद्मासनेन भगवान्विधत्ते पार्थिवेन तु ॥१५

आत्मनः परमं धाम रूपहीनं विचिन्तयेत् ।
दृष्टयर्थं जगतामास्ते ध्यानसम्मीलितेक्षणः ॥१६

तथैवौषधयो राजञ्जगद्धारणकारणाः ।
ब्रह्मणस्ता जटा ज्ञेयाः सर्वगस्य महात्मनः ॥१७

प्रकाशकानि लोकस्य विद्यास्थानानि यानि च ।
तस्याभरणजातानि ज्ञेयानि परमेष्ठिनः ॥१८

एतद्धि तस्याप्रतिमस्य रूपं
तवेरितं सर्वजगन्मयस्य ।
एवं शरीरेण जगत्समग्रं
संधारयत्येव जगत्प्रधानः ॥१९

अध्याय ६३

मार्कण्डेयः—

पद्मपत्रासनस्थस्तु ब्रह्मा कार्यश्चतुर्मुखः ।
सावित्री तस्य कर्तव्या वामोत्सङ्गगता तथा ॥१

आदित्यवर्णा धर्मज्ञ साक्षमालाकरा तथा ।
रूपं पूर्वोदितं कार्यं सर्वमन्यज्जगत्पते ॥२

एतद्धि रूपं वरदस्य कार्यं
पितामहस्याप्रतिमस्य सौम्य ।
पूर्वोदितं वा वरदस्य तस्य
लोकं समग्रं वशगं हि यस्य ॥३

6. वामनपुराणम्

अध्याय २३।१

देवदेव उवाच—

सरस्वतीदृषद्वत्योरन्तरे कुरुजाङ्गले ।
मुनिप्रवरमासीनं पुराणं लोमहर्षणम् ।
अपृच्छन्त द्विजवराः प्रभावं सरसस्तदा ॥१

प्रमाणं सरसो ब्रूहि तीर्थानां च विशेषतः ।
देवतानां च माहात्म्यमुत्पत्तिं वामनस्य च ॥२

एतच्छ्रुत्वा वचस्तेषां रोमहर्षसमन्वितः ।
प्रणिपत्य पुराणर्षिरिदं वचनमब्रवीत् ॥३

लोमहर्षण उवाच—

ब्रह्माणमग्र्यं कमलासनस्थं
विष्णुं तथा लक्ष्मिसमन्वितं च ।
रुद्रं च देवं प्रणिपत्य मूर्ध्ना
तीर्थं महद् ब्रह्मसरः प्रवक्ष्ये ॥४

रन्तुकादौजसं यावत् पावनाच्च चतुर्मुखम् ।
सरः सन्निहितं ब्रह्मणा पूर्वमेव तु ॥५

कलिद्वापरयोर्मध्ये व्यासेन च महात्मना ।
सरःप्रमाणं यत्प्रोक्तं तच्छृणुध्वं द्विजोत्तमाः ॥६

विश्वेश्वरादस्थिपुरं तथा कन्या जरद्गवी ।
यावदोघवती प्रोक्ता तावत्सन्निहितं सरः ॥७

मया श्रुतं प्रमाणं यत् पठ्यमानं तु वामने ।
तच्छृणुध्वं द्विजश्रेष्ठाः पुण्यं वृद्धिकरं महत् ॥८

विश्वेश्वराद् देववरा नृपावनात् सरस्वती ।
सरःसन्निहितं ज्ञेयं समन्तादर्धयोजनम् ॥९

एतदाश्रित्य देवाश्च ऋषयश्च समागताः ।
सेवन्ते मुक्तिकामार्थं स्वर्गार्थे चापरे स्थिताः ॥१०

ब्रह्मणा सेवितमिदं सृष्टिकामेन योगिना ।
विष्णुना स्थितिकामेन हरिरूपेण सेवितम् ॥११

रुद्रेण च सरो मध्यं प्रविष्टेन महात्मना ।
सेव्यं तीर्थं महातेजाः स्थाणुत्वं प्राप्तवान् हरः ॥१२

आद्यैषा ब्रह्मणो वेदिस्ततो रामह्रदः स्मृतः ।
कुरुणा च यतः कृष्टं कुरुक्षेत्रं ततः स्मृतम् ॥१३

तरन्तुकारन्तुकयोर्यदन्तरं
यदन्तरं रामह्रदाच्चतुर्मुखम् ।
एतत्कुरुक्षेत्रसमन्तपञ्चकं
पितामहस्योत्तरवेदिरुच्यते ॥१४

अध्याय २३।४

As advised by Brahmā, the gods go to the Śveta-dvīpa and perform austerities there :

ब्रह्मोवाच—

यदर्थमिह संप्राप्ता भवन्तः सर्व एव हि
चिन्तयाम्यहमप्यग्रे तदर्थं च महाबलाः ॥१

भविष्यति च वः सर्वं काङ्क्षितं यत् सुरोत्तमाः ।
बलेर्दानवमुख्यस्य योऽस्य जेता भविष्यति ॥२

न केवलं सुरादीनां गतिर्मम स विश्वकृत् ।
त्रैलोकस्यापि नेता च देवानामपि स प्रभुः ॥३

यः प्रभुः सर्वलोकानां विश्वेशश्च सनातनः ।
पूर्वजोऽयं सदाप्याहुरादिदेवं सनातनम् ॥४

तं देवापि महात्मानं न विदुः कोऽप्यसाविति ।
देवानस्मान् श्रुतिं विश्वं स वेत्ति पुरुषोत्तमः ॥५

तस्यैव तु प्रसादेन प्रवक्ष्ये परमां गतिम् ।
यत्र योगं समास्थाय तपश्चरति दुश्चरम् ॥६

क्षीरोदस्योत्तरे कूले उदीच्यां दिशि विश्वकृत् ।
अमृतं नाम परमं स्थानमाहुर्मनीषिणः ॥७

भवन्तस्तत्र गत्वा तपसा शंसितव्रताः ।
अमृतं स्थानमासाद्य तपश्चरत दुश्चरम् ॥८

ततः श्रोष्यथ संघुष्टां स्निग्धगम्भीरनिःस्वनम् ।
उष्णान्ते तोयदस्येव तोयपूर्णस्य निःस्वनम् ॥९

रक्तां पुष्टाक्षरां रम्यामभयां सर्वदा शिवाम् ।
वाणीं परमसंस्कारां वदतां ब्रह्मवादिनाम् ॥१०

दिव्यां सत्यकरीं सत्यां सर्वकल्मषनाशिनीम् ।
सर्वदेवाधिदेवस्य ततोऽसौ भावितात्मनः ॥११

तस्य व्रतसमाप्त्यां तु योगव्रतविसर्जने ।
अमोघं तस्य देवस्य विश्वतेजो महात्मनः ॥१२

कस्य किं वो वरं देवा ददामि वरदः स्थितः ।
स्वागतं वः सुरश्रेष्ठा मत्समीपमुपागताः ॥१३

ततोऽदितिः कश्यपश्च गृह्णीयातां वरं तदा ।
प्रणम्य शिरसा पादौ तस्मै देवाय धीमते ॥१४

भगवानेव नः पुत्रो भवत्विति प्रसीद नः ।
उक्तश्च परया वाचा तथाऽस्त्विति स वक्ष्यति ॥१५

देवा ब्रुवन्ति ते सर्वे कश्यपोऽदितिरेव च ।
तथाऽस्त्विति सुराः सर्वे प्रणम्य शिरसा प्रभुम् ।
श्वेतद्वीपं समुद्दिश्य गताः सौम्यदिशं प्रति ॥१६

तेऽचिरेणैव संप्राप्ताः क्षीरोदं सरितां पतिम् ।
यथोद्दिष्टं भगवता ब्रह्मणा सत्यवादिना ॥१७

ते क्रान्ताः सागरान् सर्वान् पर्वतांश्च सकाननान् ।
नदीश्च विविधा दिव्याः पृथिव्यां ते सुरोत्तमाः ॥१८

अपश्यन्त तमो घोरं सर्वसत्त्वविवर्जितम्
अभास्करमर्यादं तमसा सर्वतो वृतम् ॥१९

अमृतं स्थानमासाद्य कश्यपेन महात्मना ।
दीक्षिताः कामदं दिव्यं व्रतं वर्षसहस्रकम् ॥२०

प्रसादार्थं सुरेशाय तस्मै योगाय धीमते ।
नारायणाय देवाय सहस्राक्षाय भूतये ॥२१

ब्रह्मचर्येण मौनेन स्थानवीरासनेन च ।
क्रमेण च सुराः सर्वे तप उग्रं समास्थिताः ॥२२

कश्यपस्तत्र भगवान् प्रसादार्थं महात्मनः ।
उदीरयत वेदोक्तं यमाहुः परमं स्तवम् ॥२३

अध्याय २३।२२

The birth of Brahmā, etc.,

ऋषय ऊचुः—

स्थाणुतीर्थस्य माहात्म्यं वटस्य च महामुने ।
सान्निहत्यसरोत्पत्तिं पूरणं पांशुना ततः ॥१

लिङ्गानां दर्शनात् पुण्यं स्पर्शनेन च किं फलम् ।
तथैव सरमाहात्म्यं ब्रूहि सर्वमशेषतः ॥२

लोमहर्षण उवाच—

शृण्वन्तु मुनयः सर्वे पुराणं वामनं महत् ।
यच्छ्रुत्वा मुक्तिमाप्नोति प्रसादाद् वामनस्य तु ॥३

सनत्कुमारमासीनं स्थाणोर्वटसमीपतः ।
ऋषिभिर्बालखिल्याद्यैर्ब्रह्मपुत्रैर्महात्मभिः ॥४

मार्कण्डेयो मुनिस्तत्र विनयेनाभिगम्य च ।
प्रपच्छ सरमाहात्म्यं प्रमाणं च स्थितिं तथा ॥५

मार्कण्डेय उवाच–

ब्रह्मपुत्र महाभाग सर्वशास्त्रविशारद ।
ब्रूहि मे सरमाहात्म्यं सर्वपापक्षयावहम् ॥६

कानि तीर्थानि दृश्यानि गुह्यानि द्विजसत्तम ।
लिङ्गानि ह्यतिपुण्यानि स्थाणोर्यानि समीपतः ॥६

येषां दर्शनमात्रेण मुक्ति प्राप्नोति मानवः ।
वटस्य दर्शनं पुण्यमुत्पत्तिं कथयस्व मे ॥८

× × ×

पर्यङ्कं शिथिलीकृत्वा नमस्कृत्वा महेश्वरम् ।
कथयामास तत्सर्वं यच्छ्रुतं ब्रह्मणः पुरा ॥१५

सनत्कुमार उवाच—

नमस्कृत्य महादेवमीशानं वरदं शिवम् ।
उत्पत्तिं च प्रवक्ष्यामि तीर्थानां ब्रह्मभाषितम् ॥१६

पूर्वमेकार्णवे घोरे नष्टे स्थावरजङ्गमे ।
बृहदण्डमभूदेकं प्रजानां बीजसंभवम् ॥१७

तस्मिन्नण्डे स्थितो ब्रह्मा शयनायोपचक्रमे ।
सहस्रयुगपर्यन्तं सुप्त्वा स प्रत्यबुध्यत ॥१८

सुप्तोत्थितस्तदा ब्रह्मा शून्यं लोकमपश्यत ।
सृष्टिं चिन्तयतस्तस्य रजसा मोहितस्य च ।।१६

रजः सृष्टिगुणं प्रोक्तं सत्त्वं स्थितिगुणं विदुः ।
उपसंहारकाले च तमोगुणः प्रवर्तते ॥२०

गुणातीतः स भगवान् व्यापकः पुरुषः स्मृतः ।
तेनेदं सकलं व्याप्तं यत्किंचिज्जीवसंज्ञितम् ॥२१

स ब्रह्मा स च गोविन्द ईश्वरः स सनातनः ।
यस्तं वेद महात्मानं स सर्वं वेद मोक्षवित् ॥२२

× × ×

इदानीं शृणु चोत्पत्तिं ब्रह्मणः परमात्मनः ।
इमं चोदाहरन्त्येव श्लोकं नारायणं प्रति ॥२८

आपो नारा वै तनय इत्येवं नाम शुश्रुमः ।
तासु शेते स यस्माच्च तेन नारायणः स्मृतः ॥२९

विबुद्धः सलिले तस्मिन् विज्ञायान्तर्गतं जगत् ।
अण्डं विभेद भगवांस्तस्मादोमित्यजायत ॥३०

ततो भूरभवत् तस्माद्द् भुव इत्यपरः स्मृतः ।
ततो भूरभवत् तस्माद्द् भुव इत्यपरः स्मृतः ।
स्वः शब्दश्च तृतीयोऽभूद् भूर्भुवः स्वेति संज्ञितः ॥३१

तस्मात्तेजः समभवत् तत्सवितुर्वरेण्यं यत् ।
उदकं शोषयामास यत्तेजोऽण्डविनिःसृतम् ॥३२

तेजसा शोषितं शेषं कललत्वमुपागतम् ।
कललाद् बुद्बुदं ज्ञेयं ततः काठिन्यतां गतम् ॥३३

काठिन्याद् धरणी ज्ञेया भूतानां धारिणी हि सा ।
यस्मिन् स्थाने स्थितं ह्यण्डं तस्मिन् सन्निहितं सरः ॥३४

यदाद्यं निःसृतं तेजस्तस्मादादित्य उच्यते ।
अण्डमध्ये समुत्पन्नो ब्रह्मा लोकपितामहः ॥३५

उल्बं तस्याभवन्मेरुर्जरायुः पर्वताः स्मृताः ।
गर्भोदकं समुद्राश्च तथा नद्यः सहस्रशः ॥३६

नाभिस्थाने यदुदकं ब्रह्मणो निर्मलं महत् ।
महत्सरस्तेन पूर्णं विमलेन वराम्भसा ॥३७

तस्मिन् मध्ये स्थाणुरूपी वटवृक्षो महामनः ।
तस्माद् विनिर्गता वर्णा ब्राह्मणाः क्षत्रिया विशः ॥३८

शूद्राश्च तस्मादुत्पन्नाः शुश्रूषार्थं द्विजन्मनाम् ।
ततश्चिन्तयतः सृष्टिं ब्रह्मणोऽव्यक्तजन्मनः ।
मनसा मानसा जाताः सनकाद्या महर्षयः ॥३९

पुनश्चिन्तयतस्तस्य प्रजाकामस्य धीमतः ।
उत्पन्ना ऋषयः सप्त ते प्रजापतयोऽभवन् ॥४०

पुनश्चिन्तयतस्तस्य रजसा मोहितस्य च ।
बालखिल्याः समुत्पन्नास्तपःस्वाध्यायतत्पराः ॥४१

× × ×

अध्याय २३।२८

Formation of the Caturmukha-liṅgas, Śiva's eulogy by Brahmā and the māhātmya of the Sthāṇu :

मार्कण्डेय उवाच—

चतुर्मुखानामुत्पत्तिं विस्तरेण ममानघ ।
तथा ब्रह्मेश्वराणां च श्रोतुमिच्छा प्रवर्तते ॥१

सनत्कुमार उवाच—

शृणु सर्वमशेषेण कथयिष्यामि तेऽनघ ।
ब्रह्मणः स्रष्टुकामस्य यद् वृत्तं पद्मजन्मनः ॥२

उत्पन्न एव भगवान् ब्रह्मा लोकपितामहः ।
ससर्ज सर्वभूतानि स्थावराणि चराणि च ॥३

पुनश्चिन्तयतः सृष्टिं जज्ञे कन्या मनोरमा ।
नीलोत्पलदलश्यामा तनुमध्या सुलोचना ॥४

तां दृष्ट्वाभिमतां ब्रह्मा मैथुनायाजुहाव ताम् ।
तेन पापेन महता शिरोऽशीर्यत वेधसः ॥५

तेन शीर्णेन स ययौ तीर्थं त्रैलोक्यविश्रुतम् ।
सान्निहत्यं सरः पुण्यं सर्वपापक्षयावहम् ॥६

तत्र पुण्ये स्थाणुतीर्थे ऋषिसिद्धनिषेविते ।
सरस्वत्युत्तरे तीरे प्रतिष्ठाप्य चतुर्मुखम् ॥७

आराधयामास तदा धूपैर्गन्धैर्मनोरमैः ।
उपहारैस्तथा हृद्यै रौद्रसूक्तैर्दिने दिने ॥८

तस्यैवं भक्तियुक्तस्य शिवपूजापरस्य च ।
स्वयमेवाजगामाथ भगवान् नीललोहितः ॥९

तमागतं शिवं दृष्ट्वा ब्रह्मा लोकपितामहः ।
प्रणम्य शिरसा भूमौ स्तुतिं तस्य चकार ह ॥१०

ब्रह्मोवाच—

नमस्तेऽस्तु महादेव भूतभव्य भवाश्रय ।
नमस्ते स्तुतिनित्याय नमस्त्रैलोक्यपालिने ॥११

नमः पवित्रदेहाय सर्वकल्मषनाशिने ।
चराचरगुरो गुह्यगुह्यानां च प्रकाशकृत् ॥१२

× × ×

फणीन्द्रवरहाराय भास्कराय नमो नमः ॥१८

एवं स्तुतो महादेवो ब्रह्माणं प्राह शङ्करः ।
न च मन्युस्त्वया कार्यो भाविन्यर्थे कदाचन ॥१९

पुरा वराहकल्पे ते यन्मयाऽपहृतं शिरः ।
चतुर्मुखं च तदभून्न कदाचिन्नशिष्यति ॥२०

अस्मिन् सान्निहिते तीर्थे लिङ्गानि मम भक्तितः ।
प्रतिष्ठाय विमुक्तस्त्वं सर्वपापैर्भविष्यसि ॥२१

सृष्टिकामेन च पुरा त्वयाऽहं प्रेरितः किल ।
तेनाहं त्वां तथेत्युक्त्वा भूतानां देशवर्त्तिवत् ॥२२

दीर्घकालं तपस्तप्त्वा मग्नः सन्निहिते स्थितः ।
सुमहान्तं ततः कालं त्वं प्रतीक्षां समाकरोः ॥२३

स्रष्टारं सर्वभूतानां मनसा कल्पितं त्वया ।
सोऽब्रवीत् त्वां तदा दृष्ट्वा मां मग्नं तत्र चाम्भसि ॥२४

यदि मे नाग्रजस्त्वन्यस्ततः स्रक्ष्याम्यहं प्रजाः ।
त्वयैवोक्तश्च नैवास्ति त्वदन्यः पुरुषोऽग्रजः ॥२५

स्थाणुरेष जले मग्नो विवशः कुरु मद्धितम् ।
स सर्वभूतानसृजद् दक्षादींश्च प्रजापतीन् ॥२६

यैरिमं प्रकरोत् सर्वं भूतग्रामं चतुर्विधम् ।
ताः सृष्टमात्राः क्षुधिताः प्रजाः सर्वाः प्रजापतिम् ॥२७

बिभक्षयिषवो ब्रह्मन् सहसा प्राद्रवंस्तथा ।
स भक्ष्यमाणस्त्राणार्थी पितामहमुपाद्रवत् ॥२८

अथासां च महावृत्तिः प्रजानां संविधीयताम् ।
दत्तं ताभ्यस्त्वया ह्यन्नं स्थावराणां महौषधीः ॥२९

जङ्गमानि च भूतानि दुर्बलानि बलीयसाम् ।
विहितान्नाः प्रजाः सर्वाः पुनर्जग्मुर्यथागतम् ॥३०

ततो ववृधिरे सर्वाः प्रीतियुक्ताः परस्परम् ।
भूतग्रामे विवृद्धे तु तुष्टे लोकगुरौ त्वयि ॥३१

समुत्तिष्ठन् जलात् तस्मात् प्रजाः संदृष्टवानहम् ।
ततोऽहं ताः प्रजाः दृष्ट्वा विहिताः स्वेन तेजसा ॥३२

क्रोधेन महता युक्तो लिङ्गमुत्पाट्य चाक्षिपम् ।
तत् क्षिप्तं सरसो मध्ये ऊर्ध्वमेव यदा स्थितम् ॥३३

तदा प्रभृति लोकेषु स्थाणुरित्येष विश्रुतः ।
सकृद् दर्शनमात्रेण विमुक्तः सर्वकिल्बिषैः ॥३४

× × ×

स मुक्तः पातकैः सर्वैरगम्यागमनोद्भवैः ।
इत्युक्त्वा भगवान् देवस्तत्रैवान्तरधीयत ॥३६

ब्रह्मा विशुद्धपापस्तु पूज्य देवं चतुर्मुखम् ।
लिङ्गानि देवदेवस्य ससृजे सरमध्यतः ॥३७

आद्यं ब्रह्मसरः पुण्यं हरिपार्श्वे प्रतिष्ठितम् ।
द्वितीयं ब्रह्मसदनं स्वकीये ह्याश्रमे कृतम् ॥३८

तस्यैव पूर्वदिग्भागे तृतीयं च प्रतिष्ठितम् ।
चतुर्थं ब्रह्मणा लिङ्गं सरस्वत्यास्तटे कृतम् ॥३९

× × ×

कृते युगे हरेः पार्श्वे त्रेतायां ब्रह्मणाश्रमे ।
द्वापरे तस्य पूर्वेण सरस्वत्यास्तटे कलौ ॥४१

× × ×

सृष्टिकाले भगवता पूजितस्तु महेश्वरः ।
सरस्वत्युत्तरे तीरे नाम्ना ख्यातश्चतुर्मुखः ॥४३

× × ×

तथैव द्वापरे प्राप्ते स्वाश्रमे पूज्य शङ्करम् ।
विमुक्तो राजसैर्भावैर्वर्णसंकरसंभवैः ॥४५

× × ×

कलिकाले तु संप्राप्ते वसिष्ठाश्रममास्थितः ।
चतुर्मुखं स्थापयित्वा ययौ सिद्धिमनुत्तमाम् ॥४७

तत्रापि ये निराहाराः श्रद्दधाना जितेन्द्रियाः ।
पूजयन्ति महादेवं ते यान्ति परमं पदम् ॥४८

इत्येतत् स्थाणुतीर्थस्य माहात्म्यं कीर्त्तितं तव ।
यच्छ्रुत्वा सर्वपापेभ्यो मुक्तो भवति मानवः ॥४९

अध्याय ३५

Account of the puṁ-nāma hells.; twelve kinds of sons; Sanatkumāra becomes Brahmā's adopted son and learns the yoga from Brahmā :

ब्रह्मोवाच—

परदाराभिगमनं पापीयांसोपसेवनम् ।
पारुष्यं सर्वभूतानां प्रथमं नरकं स्मृतम् ॥१

फलस्तेयं महापापं फलहीनं तथाऽटनम् ।
छेदनं वृक्षजातीनां द्वितीयं नरकं स्मृतम् ॥२

वर्ज्यादानं तथा दुष्टमवध्यवधबन्धनम् ।
विवादमर्थहेतूत्थं तृतीयं नरकं स्मृतम् ॥३

भयदं सर्वसत्त्वानां भवभूतिविनाशनम् ।
भ्रंशनं निजधर्माणां चतुर्थं नरकं स्मृतम् ॥४

मारणं मित्रकौटिल्यं मिथ्याऽभिशपनं च यत् ।
मिष्टैकाशनमित्युक्तं पञ्चमं तु नृपाचनम् ॥५

यन्त्रः फलादिहरणं यमनं योगनाशनम् ।
यानयुग्यस्य हरणं षष्ठमुक्तं नृपाचनम् ॥६

राजभागहरं मूढं राजजायानिषेवणम् ।
राज्ये त्वहितकारित्वं सप्तमं निरयं स्मृतम् ॥७

लुब्धत्वं लोलुपत्वं च लब्धधर्मार्थनाशनम् ।
लालासंकीर्णमेवोक्तमष्टमं नरकं स्मृतम् ॥८

विप्रोष्यं ब्रह्महरणं ब्राह्मणानां विनिन्दनम् ।
विरोधं बन्धुभिश्चोक्तं नवमं नरपाचनम् ॥९

शिष्टाचारविनाशं च शिष्टद्वेषं शिशोर्वधम् ।
शास्त्रस्तेयं धर्मनाशं दशमं परिकीर्तितम् ॥१०

षडङ्गनिधनं घोरं षाड्गुण्यप्रतिषेधनम् ।
एकादशममेवोक्तं नरकं सद्भिरुत्तमम् ॥११

सत्सु नित्यं सदा वैरमनाचारमसत्क्रिया ।
संस्कारपरिहीनत्वमिदं द्वादशं स्मृतम् ॥१२

हानिर्धर्मार्थकामानामपवर्गस्य हारणम् ।
संभेदः संविदामेतत् त्रयोदशममुच्यते ॥१३

कृपणं धर्महीनं च यद् वर्ज्यं यच्च वह्निदम् ।
चतुर्दशममेवोक्तं नरकं तद् विगर्हितम् ॥१४

अज्ञानं चाप्यसूयत्वमशौचमशुभावहम् ।
स्मृतं तत् पञ्चदशममसत्यवचनानि च ॥१५

आलस्यं वै षोडशममाक्रोशं च विशेषतः ।
सर्वस्य चाततायित्वमावासेष्वग्निदीपनम् ॥१६

इच्छा च परदारेषु नरकाय निगद्यते ।
ईर्ष्याभावश्च सत्येषु उद्वृत्तं तु विगर्हितम् ॥१७

एतैस्तु पापैः पुरुषः पुन्नामाद्यैर्न संशयः ।१८ पूर्वा०

× × ×

तस्मात् पुत्रश्च शिष्यश्च विधातव्यौ विपश्चिता ।
एतदर्थमभिध्याय शिष्याच्छ्रेष्ठतरः सुतः ।
शेषात् तारयते शिष्यः सर्वतोऽपि हि पुत्रकः ॥२६

पुलस्त्य उवाच–

पितामहवचः श्रुत्वा साध्यः प्राह तपोधनः ।
त्रिः सत्यं तव पुत्रोऽहं देव योगं वदस्व मे ॥३०

तमुवाच महायोगी त्वन्मातापितरौ यदि ।
दास्येते च ततः सूनुर्दायादो मेऽसि पुत्रक ॥३१

सनत्कुमारः प्रोवाच दायादपरिकल्पना ।
येयं हि भवता प्रोक्ता तां मे व्याख्यातुमर्हसि ॥३२

तदुक्तं साध्यमुख्येन वाक्यं श्रुत्वा पितामहः ।
प्राह प्रहस्य भगवान् शृणु वत्सेति नारद ॥३३

ब्रह्मोवाच—

औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवास्तु षट् ॥३४

× × ×

कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तः पारशवः षडदायादबान्धवाः ॥३६

× × ×

तत् तस्य वचनं श्रुत्वा ब्रह्मणः सनकाग्रजः ।
उवाचैषां विशेषं मे ब्रह्मन् व्याख्यातुमर्हसि ॥३८

ततोऽब्रवीत् सुरपतिर्विशेषं शृणु पुत्रक ।
औरसो यः स्वयं जातः प्रतिबिम्बमिवात्मनः ॥३९

× × ×

एतस्मात् कारणात् पुत्र न स्वयं दातुमर्हसि ।
स्वमात्मानं गच्छ शीघ्रं पितरौ समुपाह्वय ॥४७

ततः स मातापितरौ सस्मार वचनाद् विभोः ।
तावाजग्मतुरीशानं द्रष्टुं वै दम्पती मुने ॥४८

धर्मोऽहिंसा च देवेशं प्रणिपत्य न्यषीदताम् ।
उपविष्टौ सुखासीनौ साध्यो वचनमब्रवीत् ॥४९

सनत्कुमार उवाच—

योगं जिगमिषुस्तात ब्रह्माणं समचूचुदम् ।
स चोक्तवान् मां पुत्रार्थे तस्मात् त्वं दातुमर्हसि ॥५०

तावेवमुक्तौ पुत्रेण योगाचार्यं पितामहम् ।
ऊक्तवन्तौ प्रभोऽयं हि आवयोस्तनयस्तव ॥५१

अद्यप्रभृत्ययं पुत्रस्तव ब्रह्मन् भविष्यति ।
इत्युक्त्वा जग्मतुस्तूर्णं येनैवाभ्यागतौ यथा ॥५२

पितामहोऽपि तं पुत्रं साध्यं सद्विनयान्वितम् ।
सनत्कुमारं प्रोवाच योगं द्वादशपत्रकम् ॥५३

× × ×

See other references (VāmP.,) :

Eulogy of Śiva by Brahmā (Chapter 23.1 ff.); Bali commences his yajña in the Kurukṣetra; birth of Vāmana and his eulogy by Brahmā (Chapt. 62)

७. ब्रह्मपुराणम्

अध्याय १

Birth of Brahmā; he divides the egg into two; birth of Marīci, etc.; Rudra, etc., from Brahmā; etc.

× × ×

अव्यक्तं कारणं यत्तन्नित्यं सदसदात्मकम् ।
प्रधानं पुरुषस्तस्मान्निर्म्ममे विश्वमीश्वरः ।।३३

तं बुध्यध्वं मुनिश्रेष्ठा ब्रह्माणममितौजसम् ।
स्रष्टारं सर्व्वभूतानां नारायणपरायणम् ।।३४

अहङ्कारस्तु महतस्तस्माद् भूतानि जज्ञिरे ।
भूतभेदाश्च भूतेभ्य इति सर्गः सनातनः ।।३५

विस्तारावयवं चैव यथाप्रज्ञं यथाश्रुति ।
कीर्त्यमानं शृणुध्वं वः सर्व्वेषां कीर्त्तिवर्धनम् ।।३६

कीर्त्तितं स्थिरकीर्तिनां सर्व्वेषां पुण्यवर्धनम् ।
ततः स्वयम्भूर्भगवान् सिसृक्षुर्विविधाः प्रजाः ।।३७

अप एव ससर्ज्जादौ तासु वीर्य्यमथासृजत् ।
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।।३८

अयनं तस्य ताः पूर्व्वं तेन नारायणः स्मृतः ।
हिरण्यवर्णमभवत्तदण्डमुदकेशयम् ।।३९

तत्र जज्ञे स्वयं ब्रह्मा स्वयम्भूरिति नः श्रुतम् ।
हिरण्यवर्णो भगवानुषित्वा परिवत्सरम् ।।४०

तदण्डमकरोद्द्वैधं दिवं भुवमथापि च ।
तयोः शकलयोर्मध्य आकाशमकरोत्प्रभुः ।।४१

अप्सु पारिप्लवां पृथ्वीं दिशश्च दशधा दधे ।
तत्र कालं मनो वाचं कामं क्रोधमथो रतिम् ।।४२

ससर्ज सृष्टिं तद्रूपां स्रष्टुमिच्छन् प्रजापतीन् ।
मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ॥४३

वसिष्ठं च महातेजाः सोऽसृजत्सप्त मानसान् ।
सप्त ब्रह्माण इत्येते पुराणे निश्चयं गताः ॥४४

नारायणात्मकानां तु सप्तानां ब्रह्मजन्मनाम् ।
ततोऽसृजत् पुरा ब्रह्मा रुद्रं रोषात्मसम्भवम् ॥४५

सनत्कुमारं च विभुं पूर्व्वेषामपि पूर्व्वजम् ।
सप्तस्वेता अजायन्त प्रजा रुद्राश्च मो द्विजाः ॥४६

स्कन्दः सनत्कुमारश्च तेजः संक्षिप्य तिष्ठतः ।
तेषां सप्त महावंशा देवगणान्विताः ॥४७

क्रियावन्तः प्रजावन्तो महर्षिभिरलङ्कृताः ।
विद्युतोऽशनिमेघाश्च रोहितेन्द्रधनूंषि च ॥४८

वयांसि च ससर्जादौ पर्जन्यश्च ससर्ज ह ।
ऋचो यजूंषि सामानि निर्म्ममे यज्ञसिद्धये ॥४९

साध्यानजनयद् देवानित्येवमनुसञ्जगुः ।
उच्चावचानि भूतानि गात्रेभ्यस्तस्य जज्ञिरे ॥५०

आपवस्य प्रजासर्गं सृजतो हि प्रजापतेः ।
सृज्यमानाः प्रजा नैव विवर्द्धन्ते यदा तदा ॥५१

द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत् ।
अर्द्धेन नारी तस्यां तु सोऽसृजद्विविधाः प्रजाः ॥५२

दिवञ्च पृथिवीं चैव महिम्ना व्याप्य तिष्ठति ।
विराजमसृद्विष्णुः सोऽसृजत् पुरुषं विराट् ॥५३

पुरुषं तं मनुं विद्यात्तस्य मन्वन्तरं स्मृतम् ।
द्वितीयं मानसस्यैतन्मनोरन्तरमुच्यते ॥५४

स वैराजः प्रजासर्गं ससर्ज पुरुषः प्रभुः ।
नारायणविसर्गस्य प्रजास्तस्याप्ययोनिजाः ॥५५

आयुष्मान् कीर्त्तिमान् पुण्यप्रजावांश्च भवेन्नरः ।
आदिसर्गं विदित्वेमं यथेष्टां चाप्नुयाद् गतिम् ॥५६

अध्याय २६

The seers inquire about salvation from Brahmā; the latter tells them the glory of the Bhāratavarṣa :

व्यास उवाच–

शृणुध्वं मुनयः सर्व्वे वक्ष्यामि यदि पृच्छथ ।
यः संवादोऽभवत् पूर्व्वमृषीणां ब्रह्मणा सह ॥२७

मेरुपृष्ठे तु विस्तीर्णे नानारत्नविभूषिते ।
नानाद्रुमलताकीर्णे नानापुष्पोपशोभिते ॥२८

नानापक्षिरुते रम्ये नानाप्रसवनाकुले ।
नानासत्त्वसमाकीर्णे नानाश्चर्य्यसमन्विते ॥२९

नानावर्णशिलाकीर्णे नानाधातुविभूषिते ।
नानामुनिजनाकीर्णे नानाश्रमसमन्विते ॥३०

तमासीनं जगन्नाथं जगदयोनिं चतुर्मुखम् ।
जगत्पतिं जगद्वन्द्यं जगदाधारमीश्वरम् ॥३१

देवदानवगन्धर्व्वैर्यक्षविद्याधरोरगैः ।
मुनिसिद्धाप्सरोभिश्च वृतमन्यैर्दिवालयैः ॥३२

केचित् स्तुवन्ति तं देवं केचिद् गायन्ति चाग्रतः ।
केचिद्वाद्यानि वाद्यन्ते केचिन्नृत्यन्ति चापरे ॥३३

एवं प्रमुदिते काले सर्व्वभूतसमागमे ।
नानाकुसुमगन्धाढ्ये दक्षिणानिलसेविते ॥३४

भृग्वाद्यास्तं तदा देवं प्रणिपत्य पितामहम् ।
इममर्थमृषिवराः प्रपच्छुः पितरं द्विजाः ॥३५

ऋषय ऊचुः—

भगवञ्छ्रोतुमिच्छामः कर्म्मभूमिं महीतले ।
वक्तुमर्हसि देवेश मोक्षक्षेत्रञ्च दुर्लभम् ॥३६

व्यास उवाच—

तेषां वचनमाकर्ण्य प्राह ब्रह्मा सुरेश्वरः ।
पप्रच्छुस्ते यथा प्रश्नं तत्सर्व्वं मुनिसत्तमाः ।।३७

Adhyāya : 27 (*In the same continuation*)

ब्रह्मोवाच—

शृणुध्वं मुनयः सर्व्वे यद्वो वक्ष्यामि साम्प्रतम् ।
पुराणं वेदसम्बद्धं भुक्तिमुक्तिप्रदं शुभम् ।।१

पृथिव्यां भारतं वर्षं कर्म्मभूमिरुदाहृता ।
कर्म्मणः फलभूमिश्च स्वर्गञ्च नरकं तथा ।।२

तस्मिन् वर्षे नरः पापं कृत्वा धर्म्मञ्च भो द्विजाः ।
अवश्यं फलमाप्नोति अशुभस्य शुभस्य च ।।३

ब्राह्मणाद्याः स्वकं कर्म कृत्वा सम्यक्सुसंयताः ।
प्राप्नुवन्ति परां सिद्धिं तस्मिन् वर्षे न संशयः ।।४

धर्म्मञ्चार्थञ्च कामञ्च मोक्षञ्च द्विजसत्तमाः ।
प्राप्नोति पुरुषः सर्वं तस्मिन् वर्षे सुसंयतः ।।५

इन्द्राद्याश्च सुराः सर्व्वे तस्मिन् वर्षे द्विजोत्तमाः ।
कृत्वा सुशोभनं कर्म्म देवत्वं प्रतिपेदिरे ।।६

अन्येऽपि लेभिरे मोक्षं पुरुषाः संयतेन्द्रियाः ।
तस्मिन् वर्षे बुधाः शान्ता वीतरागा विमत्सराः ।।७

ये चापि स्वर्गे तिष्ठन्ति विमानेन गतज्वराः ।
तेऽपि कृत्वा शुभं कर्म्म तस्मिन् वर्षे दिवं गताः ।।८

निवासं भारते वर्षे आकाङ्क्षन्ति सदा सुराः ।
स्वर्गापवर्गफलदे तत्पश्यामः कदा वयम् ।।९

मुनय ऊचुः—

यदेतद् भवता प्रोक्तं कर्म्म नान्यत्र पुण्यदम् ।
पापाय वा सुरश्रेष्ठ वर्ज्जयित्वा च भारतम् ।।१०

ततः स्वर्गश्च मोक्षश्च मध्यमं तच्च गम्यते ।
न खल्वन्यत्र मर्त्यानां भूमौ कर्म्म विधीयते ॥११

तस्माद्विस्तरतो ब्रह्मन्नस्माकं भारतं वद ।
यदि तेऽस्ति दयास्मासु यथावस्थितिरेव च ॥१२

तस्माद्वर्षमिदं नाथ ये वास्मिन् वर्षपर्व्वताः ।
भेदाश्च तस्य वर्षस्य ब्रूहि सर्व्वानशेषतः ॥१३

ब्रह्मोवाच—

शृणुध्वं भारतं वर्षं नवभेदेन भो द्विजाः ।
समुद्रान्तरिता ज्ञेयास्ते समाश्च परस्परम् ॥१४

इन्द्रद्वीपः कशेरुश्च ताम्रपर्णो गभस्तिमान् ।
नागद्वीपस्तथा सौम्यो गान्धर्व्वो वारुणस्तथा ॥१५

अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः ।
योजनानां सहस्रं वै द्वीपोऽयं दक्षिणोत्तरः ॥१६

× × ×

एवं तु भारतं वर्षं नवसंस्थानसंस्थितम् ।
दक्षिणे परतो यस्य पूर्व्वे चैव महोदधिः ॥६५

हिमवानुत्तरेणास्य कार्मुकस्य यथा गुणः ।
तदेतद् भारतं वर्षं सर्व्वबीजं द्विजोत्तमाः ॥६६

ब्रह्मत्त्वममरेशत्वं देवत्वं मरुतां तथा ।
मृगयक्षाप्सरोयोनिं तद्वत् सर्पसरीसृपाः ॥६७

स्थावराणाञ्च सर्व्वेषामितो विप्राः शुभाशुभैः ।
प्रयान्ति कर्म्मभूर्विप्रा नान्या लोकेषु विद्यते ॥६८

देवानामपि भो विप्राः सदैवैष मनोरथः ।
अपि मानुष्यमाप्स्यामो देवत्वात् प्रच्युताः क्षितौ ॥६९

मनुष्यः कुरुते यत्तु तन्न शक्यं सुरासुरैः ।
तत्कर्म्मनिगडग्रस्तैस्तत्कर्म्मक्षपणोन्मुखैः ॥७०

न भारतसमं वर्षं पृथिव्यामस्ति भो द्विजाः ।
यत्र विप्रादयो वर्णाः प्राप्नुवन्त्यभिवाञ्छितम् ॥७१

धन्यास्ते भारते वर्षे जायन्ते ये नरोत्तमाः ।
धर्म्मार्थकाममोक्षाणां प्राप्नुवन्ति महाफलम् ॥७२

प्राप्यते यत्र तपसः फलं परमदुर्लभम् ।
सर्व्वदानफलञ्चैव सर्व्वयज्ञफलं तथा ॥७३

तीर्थयात्राफलञ्चैव गुरुसेवाफलं तथा ।
देवताराधनफलं स्वाध्यायस्य फलं द्विजाः ॥७४

यत्र देवाः सदा हृष्टा जन्म वाञ्छन्ति शोभनम् ।
नानाव्रतफलञ्चैव नानाशास्त्रफलं तथा ॥७५

अहिंसादिफलं सम्यक्फलं सर्व्वाभिवाञ्छितम् ।
ब्रह्मचर्यफलञ्चैव गार्हस्थ्येन च यत्फलम् ॥७६

यत्फलं वनवासेन सन्न्यासेन च यत्फलम् ।
इष्टापूर्त्तफलञ्चैव तथान्यच्छुभकर्म्मणाम् ॥७७

प्राप्यते भारते वर्षे न चान्यत्र द्विजोत्तमाः ।
कः शक्नोति गुणान् वक्तुं भारतस्याखिलान् द्विजाः ॥७८

एवं सम्यङ्मया प्रोक्तं भारतं वर्षमुत्तमम् ।
सर्व्वपापहरं पुण्यं धन्यं बुद्धिविवर्द्धनम् ॥७९

य इदं शृणुयान्नित्यं पठेद्वा नियतेन्द्रियः ।
सर्व्वपापैर्विनिर्मुक्तः विष्णुलोकं स गच्छति ॥८०

अध्याय ७२

Brahmā sees the peerless beauty of Pārvatī; his semen falls down and the Bālkhilyas originates therefrom :

ब्रह्मोवाच—

हिमवत्पर्वते श्रेष्ठे नानारत्नविचित्रिते ।
नानावृक्षलताकीर्णे नानाद्विजनिषेविते ॥१

नदीनदसरःकूपतडागादिभिरावृते ।
देवगन्धर्वयक्षादिसिद्धचारणसेविते ॥२

शुभमारुतसंपन्ने हर्षोत्कर्षैककारणे ।
मेरुमन्दरकैलासमैनाकादिनगैर्वृते ॥३

वसिष्ठागस्त्यपौलस्त्यलोमशादिभिरावृते ।
महोत्सवे वर्तमाने विवाहः समजायत ॥४

तत्र देवी रत्नमयी शोभिता स्वर्णभूषिता ।
वज्रमाणिक्यवैदूर्यतन्मयस्तम्भशोभिता ॥५

जयालक्ष्मीशुभाक्षान्तिकीर्तिपुष्ट्यादिसंवृता ।
मेरुमन्दरकैलासरैवतैः परिशोभितैः ॥६

पूजितो लोकनाथेन विष्णुना प्रभविष्णुना ।
मैनाकः पर्वतश्रेष्ठो रेजेऽतीव हिरण्मयः ॥७

ऋषयो लोकपालाश्च आदित्याः मरुद्गणाः ।
विवाहे वेदिकां चक्रुर्देवदेवस्य शूलिनः ॥८

विश्वकर्मा स्वयं त्वष्टा वेदीं चक्रे सतोरणाम् ।
सुरभी नन्दिनी नन्दा सुनन्दा कामदोहिनी ॥९

आभिस्तु शोभितेशान्या विवाहः समजायत ।
समुद्राः सरितो नागा ओषधयो लोकमातरः ॥१०

सवनस्पतिबीजाश्च सर्वे तत्र समाययुः ।
भुवः कर्म इला चक्रे ओषधयस्त्वन्नकर्म च ॥११

वरुणः पानकर्मणि दानकर्म धनाधिपः ।
अग्निश्चकार तत्रान्नं यच्चेष्टं लोकनाथयोः ॥१२

तत्र तत्र पृथक्पूजां चक्रे विष्णुः सनातनः ।
वेदाश्च सरहस्या वै गायन्ति च हसन्ति च ॥१३

नृत्यन्त्यप्सरसः सर्वा जगुर्गन्धर्वकिंनराः ।
लाजाधृक्चापि मैनाको बभूव मुनिसत्तम ॥१४

पुण्याहवाचनं वृत्तमन्तर्वेश्मनि नारद ।
वेदिकायमुपाविष्टौ दंपती सुरसत्तमौ ॥१५

प्रतिष्ठाप्याग्नि विधिवदश्मानं चापि पुत्रक ।
हुत्वा लाजांश्च विधिवत्प्रदक्षिणमथाकरोत् ॥१६

अश्मनः स्पर्शहेतोश्च देव्यङ्गुष्ठं करेऽस्पृशत् ।
विष्णुना प्रेरितः शंभुर्दक्षिणस्य पदस्य च ॥१७

तामदर्शमहं तत्र होमं कुर्वन्हरान्तिके ।
दृष्टेऽङ्गुष्ठे दुष्टबुद्ध्या वीर्यं सुस्राव मे तदा ॥१८

लज्जया कलुषीभूतः स्कन्नं वीर्यमचूर्णयम् ।
तद्वीर्याच्चूर्णितात्सूक्ष्माद्वालखिल्यास्तु जज्ञिरे ॥१९

ततो महानभूत्तत्र हाहाकारः सुरोदितः ।
लज्जया परिभूतोऽहं निर्गतस्तु तदाऽऽसनात् ॥२०

पश्यत्सु देवसंघेषु तूष्णींभूतेषु नारद ।
गच्छन्तं मां महादेवो दृष्ट्वा नन्दिनमब्रवीत् ॥२१

शिव उवाच—

ब्रह्माणमाह्वयस्वेह गतपापं करोम्यहम् ।
कृतापराधेऽपि जने सन्तः सकृपमानसाः ॥
मोहयन्त्यपि विद्वान्सं विषयाणामियं स्थितिः ॥२२

ब्रह्मोवाच—

एवमुक्त्वा स भगवानुमया सहितः शिवः ।
ममानुकम्पया चैव लोकानां हितकाम्यया ॥२३

एतच्चकार लोकेशः शृणु नारद यत्नतः ।
पापिनां पापमोक्षाय भूमिरपो भविष्यति ॥२४

तयोश्च सारसर्वस्वमाहरिष्यामि पावनम् ।
एवं निश्चित्य भगवांस्तयोः सारं समाहरत् ॥२५

भूमिं कमण्डलुं कृत्वा तत्राप: सन्निवेश्य च ।
पावमान्यादिभिः सूक्तैरभिमन्त्र्य च यत्नतः ॥२६

त्रिजगत्पावनीं शक्तिं तत्र सस्मार पापहा ।
मामुवाच स लोकेशो गृहाणेमं कमण्डलुम् ॥२७

आपो वै मातरो देव्यो भूमिर्माता तथाऽपरा ।
स्थित्युत्पत्तिविनाशानां हेतुत्वमुभयोः स्थितम् ॥२८

अत्र प्रतिष्ठितो धर्मो ह्यत्र यज्ञः सनातनः ।
अत्र भुक्तिश्च मुक्तिश्च स्थावरं जङ्गमं तथा ॥२९

स्मरणान्मानसं पापं वचनाद्वाचिकं तथा ।
स्नानपानाभिषेकाच्च प्रणश्यत्यपि कायिकम् ॥३०

एतदेवामृतं लोके नैतस्मात्पावनं परम् ।
मयाऽभिमन्त्रितं ब्रह्मन्गृहाणेमं कमण्डलुम् ॥३१

अत्रत्यं वारि यः कश्चित्स्मरेदपि पठेदपि ।
स सर्वकामानाप्नोति गृहाणेमं कमण्डलुम् ॥३२

भूतेभ्यश्चापि पञ्चभ्य आपो भूतं महोदितम् ।
तासामुत्कृष्टमेतस्माद्गृहाणेमं कमण्डलुम् ॥३३

अत्र यद्वारि शोभिष्ठं पुण्यं पावनमेव च ।
स्पृष्ट्वा स्मृत्वा च दृष्ट्वा च ब्रह्मन्पापाद्विमोक्ष्यसे ॥३४

एवमुक्त्वा महादेवः प्रादान्मम कमण्डलुम् ।
ततः सुरगणाः सर्वे भक्त्या प्रोचुः सुरेश्वरम् ॥
आह्लादश्च महांस्तत्र जयशब्दो व्यवर्तत ॥३५

देवोत्सवे मातुरजः पदाग्रं, समीक्ष्य पापात्पतितत्वमाप ।
प्रादात्कृपालुः स्मरणात्पवित्रां गङ्गां पिता पुण्यकमण्डलुस्थाम् ॥३६

× × ×

अध्याय १०१

Purūrvas goes to the assembly of Brahmā; discussions between Urvaśī and Purūrvas; Sarasvatī goes to Purūrvas; afraid of Brahmā, Sarasvatī goes to Gautamī; Gaṅgā goes to Brahmā to ward off the curse of Sarasvatī, etc.

ब्रह्मोवाच—

पुरूरवसमाख्यातं तीर्थं वेदविदो विदुः ।
स्मरणादेव पापानां नाशनं किन्तु दर्शनात् ॥१
पुरूरवा ब्रह्मसदः प्राप्य तत्र सरस्वतीम् ।
यदृच्छया देवनदीं हसन्तीं ब्रह्मणोऽन्तिके ॥
तां दृष्ट्वा रूपसंपन्नामुर्वशीं प्राह भूपतिः ॥२

राजोवाच—

केयं रूपवती साध्वी स्थितेयं ब्रह्मणोऽन्तिके ।
सर्वासामुत्तमा योषिद्दीपयन्ती सभामिमाम् ॥३

ब्रह्मोवाच—

उर्वशी प्राह राजानमियं देवनदी शुभा ।
सरस्वती ब्रह्मसुता नित्यमेति च भाति च ॥
तच्छ्रुत्वा विस्मितो राजा आनयेमां ममान्तिकम् ॥४

ब्रह्मोवाच—

उर्वशी पुनरप्याह राजानं भूरिदक्षिणम् ॥५

उर्वश्युवाच—

आनीयते महाराज तस्याः सर्वं निवेद्य च ॥६

ब्रह्मोवाच—

ततस्तां प्राहिणोत्तत्र राजा प्रीत्या तदोर्वशीम् ।
सा गत्वा राजवचनं न्यवेदयदथोर्वशी ॥७
सरस्वत्यपि तन्मेने उर्वश्या यन्निवेदितम् ।
सा तथेति प्रतिज्ञाय प्रायाद्यत्र पुरूरवाः ॥८

सरस्वत्यास्ततस्तीरे स रेमे बहुलाः समाः ।
सरस्वानभवत्पुत्रो यस्य पुत्रो बृहद्रथः ॥९

तां गच्छन्तीं नृपगृहं नित्यमेव सरस्वतीम् ।
सरस्वन्तं ततो लक्ष्म ज्ञात्वाऽन्येषु तथा कृतम् ॥१०

तस्यै ददावहं शापं भूया इति महानदी ।
मच्छापभीता वागीशा प्रागाद्देवीं च गौतमीम् ॥११

× × ×

सा गत्वा गौतमीं देवीं प्राह मच्छापमादितः ।
गङ्गाऽपि मामुवाचेदं विशापां कर्तुमर्हसि ॥१३

न युक्तं यत्सरस्वत्याः शापं त्वं दत्तवानसि ।
स्त्रीणामेष स्वभावो वै पुंस्कामा योषितो यतः ॥१४

स्वभावचपला ब्रह्मन्योषितः सकला अपि ।
त्वं कथं तु न जानीषे जगत्स्रष्टाऽम्बुजासन ॥१५

विडम्बयति कं वा न कामो वाऽपि स्वभावतः ।
ततो विशापमवदं दृश्याऽपि स्यात्सरस्वती ॥१६

तस्माच्छापान्नदी मर्त्ये दृश्याऽदृश्या सरस्वती ।
यत्रैषा संगता देवी गङ्गायां शापविह्वला ॥१७

तत्र प्रयान्नृपवरो धार्मिकः स पुरूरवाः ।
तपस्तप्त्वा समाराध्य देवं सिद्धेश्वरं हरम् ॥१८

सर्वान्कामानथावाप गङ्गायाश्च प्रसादतः ।
ततः प्रभृति तत्तीर्थं पुरूरवसमुच्यते ॥१९

सरस्वतीसंगमं च ब्रह्मतीर्थं तदुच्यते ।
सिद्धेश्वरो यत्र देवः सर्वकामप्रदं तु तत् ॥२०

× × ×

अध्याय १०२

Śiva in the disguise of a hunter, follows Brahmā running away as a deer :

ब्रह्मोवाच—

सावित्री चैव गायत्री श्रद्धा मेधा सरस्वती ।
एतानि पञ्च तीर्थानि पुण्यानि मुनयो विदुः ॥१

तत्र स्नात्वा तु पीत्वा तु मुच्यते सर्वकल्मषात् ।
सावित्री चैव गायत्री श्रद्धा मेधा सरस्वती ॥२

एता मम सुता ज्येष्ठा धर्मसंस्थानहेतवः ।
सर्वासामुत्तमां कांचिन्निर्ममे लोकसुन्दरीम् ॥३

तां दृष्ट्वा विकृता बुद्धिर्ममाऽऽसीन्मुनिसत्तमः ।
गृह्यमाणा मया बाला सा मां दृष्ट्वा पलायिता ॥४

मृगीभूता तु सा बाला मृगोऽहमभवं तदा ।
मृगव्याधोऽभवच्छंभुर्धर्मसंरक्षणाय च ॥५

ता मद्भीताः पञ्च सुता गङ्गामीयुर्महानदीम् ।
ततो महेश्वरः प्रायाद्धर्मसंरक्षणाय च ॥६

धनुर्गृहीत्वा सशरमीशोऽपि मृगरूपिणम् ।
मामुवाच वधिष्ये त्वां मृगव्याधस्तदा हरः ॥७

तत्कर्मणो निवृत्तोऽहं प्रादां कन्यां विवस्वते ।
सावित्र्याद्याः पञ्च सुता नदीरूपेण सङ्गताः ॥८

सङ्गता आगताः पुनश्चापि स्वर्गं लोकं ममान्तिकम् ।
यत्र ताः सङ्गता देव्या पञ्च तीर्थानि नारद ॥९

सङ्गतानि च पुण्यानि पञ्च नद्यः सरस्वती ।
तेषु स्नानं तथा दानं यत्किञ्चित्कुरुते नरः ॥१०

सर्वकामप्रदं तस्मान्नैष्कर्म्यान्मुक्तिदं स्मृतम् ।
तत्राभवन्मृगव्याधं तीर्थं सर्वार्थदं नृणाम् ॥
स्वर्गमोक्षफलं चान्यद्ब्रह्मतीर्थफलं स्मृतम् ॥११

× × ×

अध्याय ११३

Śiva cuts off the head of Brahmā and bears it himself :

ब्रह्मोवाच—

इदमन्यपरं तीर्थं देवानामपि दुर्लभम् ।
ब्रह्मतीर्थमिति ख्यातं भुक्तिमुक्तिप्रदं नृणाम् ॥१

स्थितेषु देवसैन्येषु प्रविष्टेषु रसातलम् ।
दैत्येषु च मुनिश्रेष्ठ तथा मातृषु तानन्नु ॥२

मदीयं पञ्चमं वक्त्रं गर्दभाकृति भीषणम् ।
तद्वक्त्रं देवसैन्येषु मयि तिष्ठत्युवाच ह ॥३

हे दैत्याः किं पलायन्ते न भयं वोऽस्तु सत्वरम् ।
आगच्छन्तु सुरान्सर्वान्भक्षयिष्वे क्षणादिति ।४

निवारयन्तं मामेवं भक्षणायोद्यतं तथा ।
तं दृष्ट्वा विबुधाः सर्वे वित्रस्ता विष्णुमब्रुवन् ॥५

त्राहि विष्णो जगन्नाथ ब्रह्मणोऽस्य मुखं लुन ।
चक्रधृग्विबुधानाह च्छेद्मि चक्रेण वै शिरः ॥६

किंतु तच्छिन्नमेवेदं संहरेत्सचराचरम् ।
मन्त्रं ब्रूमोऽत्र विबुधाः श्रूयतां सर्वमेव हि ॥७

त्रिनेत्रः कशिरश्छेत्ता स च धत्ते न संशयः ।
मया च शंभुः सर्वैश्च स्तुतः प्रोक्तस्तथैव च ॥८

यागः क्षणी दृष्टफलेऽसमर्थः, स नैव कर्तुः फलतीति मत्वा ।
फलस्य दाने प्रतिभूर्जटीति, निश्चित्य लोकः प्रतिकर्म यातः ॥९

ततः सुरेशः संतुष्टो देवानां कार्यसिद्धये ।
लोकानामुपकारार्थं तथेत्याह सुरान्प्रति ॥१०

तद्वक्त्रं पापरूपं यद्भीषणं लोमहर्षणम् ।
निकृत्य नखशस्त्रैश्च वव स्थाप्यं चेत्यथाब्रवीत् ॥११

तत्रेला विबुधानाह नाहं वोढुं शिरः क्षमा ।
रसातलमथो यास्ये उदधिश्चाप्यथाब्रवीत् ॥१२

शोषं यास्ये क्षणादेव पुनश्चोचुः शिवं सुराः ।
त्वयैवैतद् ब्रह्मशिरो धार्यं लोकानुकम्पया ॥१३

अच्छेदे जगतां नाशश्च्छेदे दोषश्च तादृशः ।
एवं विमृश्य सोमेशो दधार कशिरस्तदा ॥१४

तद्दृष्ट्वा दुष्करं कर्म गौतमीं प्राप्य पावनीम् ।
अस्तुवञ्जगतामीशं प्रणयाद्भक्तितः सुराः ॥१५

देवष्वमित्रं कशिरोऽतिभीमं, तान्भक्षणायोपगतं निकृत्य ।
नखाग्रसूचया शकलेन्दुमौलिस्त्यागेऽपि दोषात्कृपयाऽनुधत्ते ॥१६

तत्र ते विबुधाः सर्वे स्थिता ये ब्रह्मणोऽन्तिके ।
तुष्टुवुर्विबुधेशानं कर्म दृष्ट्वाऽतिदैवतम् ॥१७

ततः प्रभृति तत्तीर्थं ब्रह्मतीर्थमिति श्रुतम् ।
अद्यापि ब्रह्मणो रूपं चतुर्मुखमवस्थितम् ॥१८

शिरोमात्रं तु यः पश्येत्स गच्छेद् ब्रह्मणः पदम् ।
यत्र स्थित्वा स्वयं रुद्रो लूनवान्ब्रह्मणः शिरः ॥१९

रुद्रतीर्थं तदेव स्यात्तत्र साक्षाद्दिवाकरः ।
देवानां च स्वरूपेण स्थितो यस्मात्तदुत्तमम् ॥२०

सौर्यं तीर्थं तदाख्यातं सर्वक्रतुफलप्रदम् ।
तत्र स्नात्वा रविं दृष्ट्वा पुनर्जन्म न विद्यते ॥२१

महादेवेन यच्छिन्नं ब्रह्मणः पञ्चमं शिरः ।
क्षेत्रेऽविमुक्ते संस्थाप्य देवानां हितं कृतम् ॥२२

ब्रह्मतीर्थे शिरोमात्रं यो दृष्ट्वा गौतमीतटे ।
क्षेत्रेऽविमुक्ते तस्यैव स्थापितं योऽनुपश्यति ॥
कपालं ब्रह्मणः पुण्यं ब्रह्महा पूततां व्रजेत् ॥२३

× × ×

अध्याय १६१

Description of the Kuśatarpaṇatīrtha; birth of Brahmā and the process of the creation; description of the sacrificial description; birth of Virāṭ Puruṣa, etc :

ब्रह्मोवाच—

कुशतर्पणमाख्यातं प्रणीतासङ्गमं तथा ।
तीर्थं सर्वेषु लोकेषु भुक्तिभुक्तिप्रदायकम् ॥१

तस्य स्वरूपं वक्ष्यामि शृणु पापहरं शुभम् ।
विन्ध्यस्य दक्षिणे पार्श्वे सह्यो नाम महागिरिः ॥२

यदङ्घ्रिभ्योऽभवन्नद्यो गोदाभीमरथीमुखाः ।
यत्राभवत्तद्विरजमेकवीरा च यत्र सा ॥३

न तस्य महिमा कैश्चिदपि शक्योऽनुवर्णितुम् ।
तस्मिन्गिरौ पुण्यदेशे शृणु नारद यत्नतः ॥४

गुह्याद्गुह्यतरं वक्ष्ये साक्षाद्वेदोदितं शुभम् ।
यन्न जानन्ति मुनयो देवाश्च पितरोऽसुराः ॥५

तदहं प्रीतये वक्ष्ये श्रवणात्सर्वकामदम् ।
परः स पुरुषो ज्ञेयो ह्यव्यक्तोऽक्षर एव तु ॥६

अपरश्च क्षरस्तस्मात्प्रकृत्यन्वित एव च ।
निराकारात्सावयवः पुरुषः समजायत ॥७

तस्मादापः समुद्भूता अद्भ्यश्च पुरुषस्तथा ।
ताभ्यामब्जं समुद्भूतं तत्राहमभवं मुने ॥८

पृथिवी वायुराकाश आपो ज्योतिस्तथैव च ।
एते मत्तः पूर्वतरा एकदैवाभवन्मुने ॥९

एतानेव प्रपश्यामि नान्यत्स्थावरजङ्गमम् ।
नैव वेदास्तदा चाऽऽसन्नाहं द्रष्टाऽस्मि किंचन ॥१०

यस्मादहं समुद्भूतो न पश्येयं तमप्यथ ।
तूष्णीं स्थिते मयि तदा अश्रौषं वाचमुत्तमाम् ॥११

आकाशवागुवाच—

ब्रह्मन्कुरु जगत्सृष्टिं स्थावरस्य चरस्य च ॥१२

ब्रह्मोवाच—

ततोऽहमब्रवं वाचं परुषां तत्र नारद ।
कथं स्रक्ष्ये क्व वा स्रक्ष्ये केन स्रक्ष्य इदं जगत् ॥१३

सैव वागब्रवीद्दैवी प्रकृतिर्याऽभिधीयते ।
विष्णुना प्रेरिता माता जगदीशा जगन्मयी ॥१४

आकाशवागुवाच—

यज्ञं कुरु ततः शक्तिस्ते भवित्री न संशयः ।
यज्ञो वै विष्णुरित्येषा श्रुतिर्ब्रह्मन्सनातनी ॥१५
किं यज्वनामसाध्यं स्यादिह लोके परत्र च ॥१६

ब्रह्मोवाच—

पुनस्तामब्रवं देवीं क्व वा केनेति तद्वद ।
यज्ञः कार्यो महाभागे ततः सोवाच मां प्रति ॥१७

आकाशवागुवाच—

ओंकारभूता या देवी मातृकल्पा जगन्मयी ।
कर्मभूमौ यजस्वेह यज्ञेशं यज्ञपूरुषम् ॥१८

स एव साधनं ते स्यात्तेन तं यज सुव्रत ।
यज्ञः स्वाहा स्वधा मन्त्रा ब्राह्मणा हविरादिकम् ॥१९

हरिरेवाखिलं तेन सर्वं विष्णोरवाप्यते ॥२०

ब्रह्मोवाच—

पुनस्तामब्रवं देवीं कर्मभूः क्व विधीयते ।
तदा नारद नैवाऽऽसीद्भागीरथ्यथ नर्मदा ॥२१

यमुना नैव तापी सा सरस्वत्यथ गौतमी ।

समुद्रो वा नदः कश्चिन्न सरः सरितोऽमलाः ॥
सा शक्तिः पुनरप्येवं मामुवाच पुनः पुनः ॥२२

दैवी वागुवाच—

सुमेरोर्दक्षिणे पार्श्वे तथा हिमवतो गिरेः ।
दक्षिणे चापि विन्ध्यस्य सह्याच्चैवाथ दक्षिणे ॥
सर्वस्य सर्वकाले तु कर्मभूमिः शुभोदया ॥२३

ब्रह्मोवाच—

तत्तु वाक्यमथो श्रुत्वा त्यक्त्वा मेरुं महागिरिम् ।
तं प्रदेशमथाऽऽगत्य स्थातव्यं क्वेत्यचिन्तयम् ॥
ततो मामब्रवीःसैव विष्णोर्वाण्यशरीरिणी ॥२४

आकाशवागुवाच—

इतो गच्छ इतस्तिष्ठ तथोपविश चात्र हि ।
संकल्पं कुरु यज्ञस्य स ते यज्ञः समाप्यते ॥२५

कृते चैवाथ संकल्पे यज्ञार्थे सुरसत्तम ।
यद्वदन्त्यखिला वेदा विधे तत्तत्समाचर ॥२६

ब्रह्मोवाच—

इतिहासपुराणानि यदन्यच्छब्दगोचरम् ।
स्वतो मुखे मम प्रायादभूच्च स्मृतिगोचरम् ॥२७

वेदार्थश्च मया सर्वो ज्ञातोऽसौ तत्क्षणेन च ।
ततः पुरुषसूक्तं तदस्मरं लोकविश्रुतम् ॥२८

यज्ञोपकरणं सर्वं तदुक्तं च त्वकल्पयम् ।
तदुक्तेन प्रकारेण यज्ञपात्राण्यकल्पयम् ॥२९

अहं स्थित्वा यत्र देशे शुचिर्भूत्वा यतात्मवान् ।
दीक्षितो विप्रदेशोऽसौ मन्नाम्ना तु प्रकीर्तितः ॥३०

मद्देवयजनं पुण्यं नाम्ना ब्रह्मगिरिः स्मृतः ।
चतुरशीतिपर्यन्तं योजनानि महामुने ॥३१

मद्देवयजनं पुण्यं पूर्वतो ब्रह्मणो गिरेः ।
तत्र मध्ये वेदिका स्याद्गार्हपत्योऽस्य (?) दक्षिणे ॥३२

तत्र चाऽऽहवनीयस्य एवमग्नींस्त्वकल्पयम् (?) ।
विना पत्न्या न सिध्येत् यज्ञः श्रुतिनिदर्शनात् ॥३३

शरीरमात्मनोऽहं वै द्वेधा चाकरवं मुने ।
पूर्वार्धेन ततः पत्नी ममाभूद्यज्ञसिद्धये ॥३४

उत्तरेण त्वहं तद्वदर्धो जाया इति श्रुतेः ।
कालं वसन्तमुत्कृष्टमाज्यरूपेण नारद ॥३५

अकल्पयं तथा चेध्मं ग्रीष्मं चापि शरद्धविः ।
ऋतं च प्रावृषं पुत्र तदा बर्हिरकल्पयम् ॥३६

छन्दांसि सप्त वै तत्र तदा परिधयोऽभवन् ।
कलाकाष्ठानिमेषा हि समित्पात्रकुशाः स्मृताः ॥३७

योऽनादिश्च त्वनन्तश्च स्वयं कालोऽभवत्तदा ।
यूपरूपेण देवर्षे योक्त्रं च पशुबन्धनम् ॥३८

सत्त्वादित्रिगुणाः पाशा नैव तत्राभवत्पशुः ।
ततोऽहमब्रवं वाचं वैष्णवीमशरीरिणीम् ॥३९

विनैव पशुना नायं यज्ञः परिसमाप्यते ।
ततो मामवदद्देवी सैव नित्याऽशरीरिणी ॥४०

आकाशवागुवाच—

पौरुषेणाथ सूक्तेन स्तुहि तं पुरुषं परम् ॥४१

ब्रह्मोवाच—

तथेत्युक्त्वा स्तूयमाने देवदेवे जानार्दने ।
मम चोत्पादके भक्त्या सूक्तेन पुरुषस्य हि ॥४२

सा च मामब्रवीद्देवी ब्रह्मन्मां त्वं पशुं कुरु ।
तदा विज्ञाय पुरुषं जनकं मम चाव्ययम् ॥४३

कालयूपस्य पार्श्वे तं गुणपाशैर्निवेशितम् ।
बर्हिस्थितमहं प्रौक्षं पुरुषं जातमग्रतः ॥४४

एतस्मिन्नन्तरे तत्र तस्मात्सर्वमभूदिदम् ।
ब्राह्मणास्तु मुखात्तस्याभवन्बाह्वोश्च क्षत्रियाः ॥४५

मुखादिन्द्रस्तथाऽग्निश्च श्वसनः प्राणतोऽभवत् ।
दिशः श्रोत्रात्तथा शीर्ष्णः सर्वः स्वर्गोऽभवत्तदा ॥४६

मनसश्चन्द्रमा जातः सूर्योऽभूच्चक्षुषस्तदा ।
अन्तरिक्षं तथा नाभेरूरुभ्यां विश एव च ॥४७

पद्भ्यां शूद्रश्च संजातस्तथा भूमिरजायत ।
ऋषयो रोमकूपेभ्य ओषधयः केशतोऽभवन् ॥४८

ग्राम्यारण्याश्च पशवो नखेभ्यः सर्वतोऽभवन् ।
कृमिकीटपतङ्गादि पायूपस्थादजायत ॥४९

स्थावरं जङ्गमं किञ्चिद्दृश्यादृश्यं च किञ्चन ।
तस्मात्सर्वमभूद्देवा मत्तश्चाप्यभवन्पुनः ॥
एतस्मिन्नन्तरे सैव विष्णोर्वागब्रवीच्च माम् ॥५०

× × ×

ब्रह्मोवाच—

तद्वाक्समकालं तु क्रमशो यज्ञयोनिषु ।
गार्हपत्ये दक्षिणाग्नौ तथा चैव महामुने ॥५४

पूर्वस्मिन्नपि चैवाग्नौ क्रमशो जुह्वतस्तदा ।
तत्र तत्र जगद्योनिमनुसंधाय पूरुषम् ॥५५

मन्त्रपूतं शुचिः सम्यग्यज्ञदेवो जगन्मयः ।
लोकनाथो विश्वकर्ता कुण्डानां तत्र सन्निधौ ॥५६

शुक्लरूपधरो विष्णुर्भवेदाहवनीयके ।
श्यामो विष्णुर्दक्षिणाग्नेः पीतो गृहपतेः कवेः ॥५७

सर्वकालं तेषु विष्णुरतो देशेषु संस्थितः ।
न तेन रहितं किञ्चिद्विष्णुना विश्वयोनिना ॥५८

प्रणीतायाः प्रणयनं मन्त्रैश्चाकरवं ततः ।
प्रणीतोदकमध्येतत्प्रणीतेति नदी शुभा ॥५९

व्यसर्जयं प्रणीतां तां मार्जयित्वा कुशैरथ ।
मार्जने क्रियमाणे तु प्रणीतोदकबिन्दवः ॥६०

पतितास्तत्र तीर्थानि जातानि गुणवन्ति च ।
संजाता मुनिशार्दूल स्नानात्क्रतुफलप्रदा ॥६१

याऽलङ्कृता सर्वकालं देवदेवेन शार्ङ्गिणा ।
सोपानपङ्क्तिः सर्वेषां वैकुण्ठारोहणाय सा ॥६२

संमार्जिताः कुशा यत्र पतिता भूतले शुभे ।
कुशतर्पणमाख्यातं बहुपुण्यफलप्रदम् ॥६३

कुशैश्च तर्पिताः सर्वे कुशतर्पणमुच्यते ।
पश्चाच्च सङ्गता तत्र गौतमी कारणान्तरात् ॥६४

प्रणीतायां महाबुद्धे प्रणीतासङ्गमोऽभवत् ।
कुशतर्पणदेशे तु तत्तीर्थं कुशतर्पणम् ॥६५

तत्रैव कल्पितो यूपो मया विन्ध्यस्य चोत्तरे ।
विसृष्टो लोकपूज्योऽसौ विष्णोरासीत्समाश्रयः ॥६६

अक्षयश्चाभवच्छ्रीमानक्षयोऽसौ वटोऽभवत् ।
नित्यश्च कालरूपोऽसौ स्मरणात्क्रतुपुण्यदः ॥६७

मद्देवयजनं चेदं दण्डकारण्यमुच्यते ।
संपूर्णे तु क्रतौ विष्णुर्मया भक्त्या प्रसादितः ॥६८

यो विराडुच्यते वेदे यस्मान्मूर्तमजायत ।
यस्माच्च मम चोत्पत्तिर्यस्येदं विकृत जगत् ॥६९

तमहं देवदेवेशमभिवन्द्य व्यसर्जयम् ।
योजनानि चतुर्विंशन्मद्देवयजनं शुभम् ॥७०

तस्मादद्यापि कुण्डानि सन्ति च त्रीणि नारद ।
यज्ञेश्वरस्वरूपाणि विष्णोर्वै चक्रपाणिनः ॥७१

ततः प्रभृति चाऽऽख्यातं मद्देवयजनं च तत् ।
तत्रस्थः कृमिकीटादिः सोऽप्यन्ते मुक्तिभाजनम् ॥७२

धर्मबीजं मुक्तिबीजं दण्डकारण्यमुच्यते ।
विशेषाद्गौतमीश्लिष्टो देशः पुण्यतमोऽभवत् ॥७३

प्रणीतासङ्गमे चापि कुशतर्पण एव वा ।
स्नानदानादि यः कुर्यात्स गच्छेत्परमं पदम् ॥७४

स्मरणं पठनं वाऽपि श्रवणं चापि भक्तितः ।
सर्वकामप्रदं पुंसां भुक्तिमुक्तिप्रदं विदुः ॥७५

उभयोस्तीरयोस्तत्र तीर्थान्याहुर्मनीषिणः ।
षडशीतिसहस्राणि तेषु पुण्यं पुरोदितम् ॥७६

वाराणस्या अपि मुने कुशतर्पणमुत्तमम् ।
नानेन सदृशं तीर्थं विद्यते सचराचरे ॥७७

ब्रह्महत्यादिपापानां स्मरणादपि नाशनम् ।
तीर्थमेतन्मुने प्रोक्तं स्वर्गद्वारं महीतले ॥७८

See other references (BrP.,) :

Brahmā, etc., eulogise Sūrya (Chapter 33); discussions between Brahmā and the Ṛṣis, Brahmā gives boons to Himālayas practising austerities and also to Pārvatī (Chapt. 34); Brahmā eulogises Śiva in order to set free gods, Brahmā praises the Himālayas, construction of a city by Brahmā for the marriage of Śiva (Chapt. 36); the Ṛṣis put questions to Brahmā and the description of the Avanti-nagarī(Chapt. 43); the Ṛṣis put questions to Brahmā, discussions between Brahmā and Viṣṇu, etc., (Chapt. 45) ; Brahmā asks Gautam to take care of Ahalyā till she attains youthhood, Brahmā renounces all the gods and tells Gautam how he can get Ahalyā (Chapt.87); Description of the Śeṣatīrtha and Śeṣa holds discussions with Brahmā (Chapt. 115); Description of the Somatīrtha, the Oṣadhis hold talk with Brahmā (Chapt. 119). King Dhanvantari holds discussions with Brahmā, discussions among Brahmā, Bṛhaspati and Indra (Chapt. 122) ; Discussions among the gods, Brahmā and the Ṛṣis (Chapt.

126) ; the Ṛṣis Vasiṣṭha, etc., do sacrifice at the Cakratīrtha, they go to Brahmā when an ogress (a giantess) comes in their way, the Māyā at the behest of Brahmā, wards off the obstacles and the sacrifice goes on (Chap. 134); Brahmā and Viṣṇu boast of their importance, an oracle address of Brahmā and Viṣṇu; Harihara curses the speech of Brahmā that came out of his mouth (Chapt. 135) ; Lakṣmī and Daridrā boast of their superiority, they go to Brahmā, at the instruction of Brahmā, they finally go to Gautamī and the latter praises Lakṣmī(Chapt. 137); Episode of the Ṛṣi Ātreya, the Ṛṣi obtains the Indrapada as a result of Brahmā's boon, but he loses it later on (Chapt. 140) ; Ravana obtains one hundred and eight names of Śiva by Brahmā (Chapt. 143) ; the Ṛṣis Mārkaṇḍeya, etc., hold discussions with Brahmā (Chapt. 145) ; the disc of Viṣṇu cuts the heads of demons, who go to Brahmā to eat him (Chapt. 156) ; the gods and demons fall prey to jealousy and at the command of Brahmā, the gods are at war with the demons (Chapt. 160); the description of the Gaṅgā related to the Kamaṇḍalu of Brahmā, etc., (Chapt. 175) ; the glory of infinite Vāsudeva and Brahmā orders Viśvakarman to build the image of the god (Chapt. 176), etc.

८. अग्निपुराणम्

अध्याय १७

सृष्टिविषयकवर्णनम्

अग्निरुवाच—

जगत्सर्गादिकां क्रीडां विष्णोर्वक्ष्येऽधुना शृणु ।
स्वर्गादिकृत् स सर्गादिः सृष्ट्यादिः सगुणोऽगुणः ॥१

ब्रह्माव्यक्तं सदाग्रेऽभूत् न खं रात्रिदिनादिकम् ।
प्रकृतिं पुरुषं विष्णुः प्रविश्याक्षोभयत्ततः ॥२

सर्गकाले महत्तत्त्वमहङ्कारस्ततोऽभवत् ।
वैकारिकस्तैजसश्च भूतादिश्चैव तामसः ॥३

अहङ्काराच्छब्दमात्रमाकाशमभवत्ततः ।
स्पर्शमात्रोऽनिलस्तस्माद्रूपमात्रोऽनलस्ततः ॥४

रसमात्रा आप इतो गन्धमात्रा मही स्मृता ।
अहङ्कारात्तामसात्तु तैजसानीन्द्रियाणि च ॥५

वैकारिका दश देवा मन एकादशेन्द्रियम् ।
ततः स्वयम्भूर्भगवान् सिसृक्षुर्विविधाः प्रजाः ॥६

अप एव ससर्जादौ तासु वीर्यमवासृजत् ।
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ॥७

अयनन्तस्य ताः पूर्वन्तेन नारायणः स्मृतः ।
हिरण्यवर्णमभवत् तदण्डमुदकेशयम् ॥८

तस्मिन् जज्ञे स्वयं ब्रह्मा स्वयम्भूरिति नः श्रुतम् ।
हिरण्यगर्भो भगवानुषित्वा परिवत्सरम् ॥९

तदण्डमकरोद् द्वैधन्दिवं भुवमथापि च ।
तयोः शकलयोर्मध्ये आकाशमसृजत् प्रभुः ॥१०

अप्सु पारिप्लवां पृथ्वीं दिशश्च दशधा दधे ।
तत्र कालं मनो वाचं कामं क्रोधमथो रतिम् ॥११

ससर्ज सृष्टिन्तद्रूपां स्रष्टुमिच्छन् प्रजापतिः ।
विद्युतोशनिमेघांश्च रोहितेन्द्रधनूंषि च ॥१२

वयांसि च ससर्जादौ पर्जन्यञ्चाथ वक्त्रतः ।
ऋचो यजूंषि सामानि निर्ममे यज्ञसिद्धये ॥१३

साध्यास्तैरयजन्देवान् भूतमुच्चावचं भुजात् ।
सनत्कुमारं रुद्रञ्च ससर्ज्ज क्रोधसम्भवम् ॥१४

मरीचिमत्र्यङ्गिरसं पुलस्त्यं पुलहं क्रतुम् ।
वसिष्ठं मानसाः सप्त ब्रह्माण इति निश्चिताः ॥१५

सप्तैते जनयन्ति स्म प्रजा रुद्राश्च सत्तम ।
द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत् ।।
अर्द्धेन नारी तस्यां स ब्रह्मा वै चासृजत् प्रजाः ।।१६

अध्याय २०

सर्गविषयकवर्णनम्

अग्निरुवाच—

प्रथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः ।
तन्मात्राणां द्वितीयस्तु भूतसर्गो हि स स्मृतः ।।१

वैकारिकस्तृतीयस्तु सर्ग ऐन्द्रियकः स्मृतः ।
इत्येष प्राकृतः सर्गः सम्भूतो बुद्धिपूर्वकः ।।२

मुख्यः सर्गश्चतुर्थस्तु मुख्या वै स्थावराः स्मृताः ।
तिर्यक्स्रोतास्तु यः प्रोक्तस्तैर्य्यग्योन्यस्ततः स्मृतः ।।३

तथोर्द्ध्वस्रोतसां षष्ठो देवसर्गस्तु स स्मृतः ।
ततोर्वाक्स्रोतसां सर्गः सप्तमः स तु मानुषः ।।४

अष्टमोनुग्रहः सर्गः सात्त्विकस्तामसश्च यः ।
पञ्चैते वैकृताः सर्गाः प्राकृताश्च त्रयः स्मृताः ।।५

प्राकृतो वैकृतश्चैव कौमारो नवमस्तथा ।
ब्रह्मतो नव सर्गास्तु जगतो मूलहेतवः ।।६

× × ×

मृत्योर्व्याधिजराशोकतृष्णाक्रोधाश्च जज्ञिरे ।
ब्रह्मणश्च रुदन् जातो रोदनाद्रुद्रनामकः ।।२०

अध्याय ११४

अग्निरुवाच—

गयामाहात्म्यमाख्यास्ये गयातीर्थोत्तमोत्तमम् ।
गयासुरस्तपस्तेपे तत्तपस्तापिभिः सुरैः ।।१

उक्तः क्षीराब्धिगो विष्णुः पालयास्मान् गयासुरात् ।
तथेत्युक्त्वा हरिर्दैत्यं वरं ब्रूहीति चाब्रवीत् ॥२

दैत्योऽब्रवीत्पवित्रोऽहं भवेयं सर्वतीर्थतः ।
तथेत्युक्त्वा गतो विष्णुर्दैत्यं दृष्ट्वा न वा हरिम् ॥३

गताः शून्या मही स्वर्गं देवा ब्रह्मादयः सुराः ।
गता ऊचुर्हरिं देवाः शून्या भूस्त्रिदिवं हरे ॥४

दैत्यस्य दर्शनादेव ब्रह्माणञ्चाब्रवीद्धरिः ।
यागार्थं दैत्यदेहं त्वं प्रार्थय त्रिदशैः सह ॥५

तच्छ्रुत्वा ससुरो ब्रह्मा गयासुरमथाब्रवीत् ।
अतिथिः प्रार्थयामि त्वान्देहं यागाय पावनम् ॥६

गयासुरस्तथेत्युक्त्वापतत्तस्य शिरस्यथ ।
यागं चकार चलिते देहि पूर्णाहुतिं विभुः ॥७

पुनर्ब्रह्माब्रवीद्विष्णुं पूर्णकालेऽसुरोऽचलत् ।
विष्णुर्धर्ममथाहूय प्राह देवमयीं शिलाम् ॥८

धारयध्वं सुराः सर्वे यस्यामुपरि सन्तु ते ।
गदाधरो मदीयाथ मूर्त्तिः स्थास्यति सामरैः ॥९

धर्मः शिलां देवमयीं तच्छ्रुत्वाधारयत् पराम् ।
या धर्माद्धर्मवत्याञ्च जाता धर्मव्रता सुता ॥१०

मरीचिर्ब्रह्मणः पुत्रस्तामुवाह तपोन्विताम् ।
यथा हरिः श्रिया रेमे गौर्य्या शम्भुस्तथा तया ॥११

कुशपुष्पाद्यरण्याच्च आनीयातिश्रमान्वितः ।
भुक्त्वा धर्मव्रतां प्राह पादसंवाहनं कुरु ॥१२

विश्रान्तस्य मुनेः पादौ तथेत्युक्त्वा प्रियाकरोत् ।
एतस्मिन्नन्तरे ब्रह्मा मुनौ सुप्ते तथागतः ॥१३

धर्मव्रताचिन्तयच्च किं ब्रह्माणं समर्चये ।
पादसंवाहनं कुर्वे ब्रह्मा पूज्यो गुरोर्गुरुः ॥१४

विचिन्त्य पूजयामास ब्रह्माणं चार्हणादिभिः ।
मरीचिस्तामपश्यत् स शशापोक्तिव्यतिक्रमात् ॥१५

शिला भविष्यसि क्रोधाद्धर्म्मव्रताऽब्रवीच्च तम् ।
पादाभ्यङ्गं परित्यज्य त्वद् गुरुः पूजितो मया ॥१६

अदोषाहं यतस्त्वं हि शापं प्राप्स्यसि शङ्करात् ।
धर्म्मव्रता पृथक् शापं धारयित्वाग्निमध्यगात् ॥१७

तपश्चचार वर्षाणां सहस्राण्ययुतानि च ।
ततो विष्णवादयो देवा वरं ब्रूहीति चाब्रुवन् ॥१८

धर्मव्रताऽब्रवीद्देवान् शापन्निर्वर्त्तयन्तु मे ।

देवा ऊचु :—

दत्तो मरीचिना शापो भविष्यति न चान्यथा ॥१९

शिला पवित्रा देवाङ्घ्रिलक्षिता त्वं भविष्यसि ।
देवव्रता देवशिला सर्व्वदेवादिरूपिणी ॥२०

सर्व्वदेवमयी पुण्या निश्चलायासुरस्य हि ।

देवव्रतोवाच—

यदि तुष्टा स्थ मे सर्वे मयि तिष्ठन्तु सर्वदा ।
ब्रह्मा विष्णुश्च रुद्राद्या गौरीलक्ष्मीमुखाः सुरा. ॥२१

अग्निरुवाच—

देवव्रतावचः श्रुत्वा तथेत्युक्त्वा दिवङ्गताः ॥२२

सा धर्मेणासुरस्यास्य धृता देवमयी शिला ।
सशिलश्चलितो दैत्यः स्थिता रुद्रादयस्ततः ॥२३

सदेवश्चलितो दैत्यस्ततो देवैः प्रसादितः ।
क्षीराब्धिगो हरिः प्रादात् स्वमूर्तिं श्रीगदाधरम् ॥२४

गच्छन्तु भोः स्वयं यास्ये मूर्त्या वै देवगम्यया ।
स्थितो गदाधरो देवो व्यक्ताव्यक्तोभयात्मकः ॥२५

निश्चलार्थं स्वयं देवः स्थित आदिगदाधरः ।
गदो नामासुरो दैत्यः स हतो विष्णुना पुरा ॥२६

तदस्थिनिर्मिता चाद्या गदा या विश्वकर्मणा ।
आद्यया गदया हेतिप्रमुखा राक्षसा हताः ॥२७

गदाधरेण विधिवत् तस्मादादिगदाधरः ।
देवमय्यां शिलायां च स्थिते चादिगदाधरे ॥२८

गयासुरे निश्चलेथ ब्रह्मा पूर्णाहुतिं ददौ ।
गयासुरोऽब्रवीद्देवान् किमर्थं वञ्चितो ह्यहम् ॥२९

विष्णोर्वचनमात्रेण किन्न स्यान्निश्चलो ह्यहम् ।
आक्रान्तो यद्यहं देवा दातुमर्हत मे वरम् ॥३०

देवा ऊचुः

तीर्थस्य करणे यत् त्वमस्माभिर्निश्चलीकृतः ।
विष्णोः शम्भोर्ब्रह्मणश्च क्षेत्रं तव भविष्यति ॥३१

प्रसिद्धं सर्वतीर्थेभ्यः पित्रादेर्ब्रह्मलोकदम् ।
इत्युक्त्वा ते स्थिता देवा देव्यस्तीर्थादयः स्थिताः ॥३२

यागं कृत्वा ददौ ब्रह्मा ऋत्विग्भ्यो दक्षिणां तदा ।
पञ्चक्रोशं गयाक्षेत्रं पञ्चाशत् पञ्च चार्पयेत् ॥३३

अध्याय १२०

Brahmāṇḍa Bhuvanakoṣā of Brahmā :

× × ×

स्वर्गलोको ध्रुवान्तस्तु नियुतानि चतुर्दश ।
एतदण्डकटाहेन वृतो ब्रह्माण्डविस्तरः ॥१२

वारिवह्न्यनिलाकाशैस्ततो भूतादिना वहिः ।
वृतं दशगुणैरण्डं भूतादिर्म्महता तथा ॥१३

दशोत्तराणि शेषाणि एकैकस्मान्महामुने ।
महान्तञ्च समावृत्य प्रधानं समवस्थितम् ॥१४

अनन्तस्य न तस्यान्तः सङ्ख्यानं नापि विद्यते ।
हेतुभूतमशेषस्य प्रकृतिः सा परा मुने ॥१५

असङ्ख्यातानि चाण्डानि तत्र जातानि चेदृशाम् ।
दारुण्यग्निर्यथा तैलं तिले तद्वत् पुमानिति ॥१६

प्रधाने च स्थितो व्यापी चेतनात्मात्मवेदनः ।
प्रधानञ्च पुमांश्चैव सर्व्वभूतात्मभूतया ॥१७

अध्याय १७६

Worship of Brahmā during the Pratipadvratas

अग्निरुवाच—

वक्ष्ये प्रतिपदादीनि व्रतान्यखिलदानि ते ।
कार्त्तिकाश्वयुजे चैत्रे प्रतिपद्ब्रह्मणस्तिथिः ॥१

पञ्चदश्यान्निराहारः प्रतिपद्यर्च्चयेदजम् ।
ओं तत् सद्ब्रह्मणे नमो गायत्र्या वाब्दमेककम् ॥२

अक्षमालास्रुवन्दक्षे वामे अचकमण्डलु ।
लम्बकूर्चञ्च जटिलं हैमं ब्रह्माणमर्च्चयेत् ॥३

शक्त्या क्षीरं प्रदद्यात्तु ब्रह्मा मे प्रीयतामिति ।
निर्मलो भोगभुक् स्वर्गे भूमौ विप्रो धनी भवेत् ॥४

अध्याय २४५

In the sacrifice of Brahmā, demon Lauhadaitya caused hinde-

rance, Hari killed the demon and as a result, **Brahmā eulogised** Hari :

× × +

सपताकास्त्रसङ्ग्राहसांवत्सरकरान्नृपः ।
ब्रह्मा वै मेरुशिखरे स्वर्गङ्गातटेऽयजत् ॥१४

लोहदैत्यं स ददृशे विघ्नं यज्ञे तु चिन्तयन् ।
तस्य चिन्तयतो वह्नेः पुरुषोऽभूद्बली महान् ॥१५

ववन्देऽजञ्च तन्देवा अभ्यनन्दन्त हर्षिताः ।
तस्मात्स नन्दकः खड्गो देवोक्तो हरिरग्रहीत् ॥१६

तं जग्राह शनैर्देवो विकोषः सोऽभ्यपद्यत ।
खड्गो नीलो रत्नमुष्ठिस्ततोऽभूच्छतबाहुकः ॥१७

दैत्यः स गदया देवान् द्रावयामास वै रणे ।
विष्णुना खड्गच्छिन्नानि दैत्यगात्राणि भूतले ॥१८

पतितानि तु संस्पर्शान्नन्दकस्य च तानि हि ।
लोहभूतानि सर्वाणि हत्वा तस्मै हरिर्वरम् ॥१९

ददौ पवित्रमङ्गन्ते आयुधाय भवेद्भुवि ।
हरिप्रसादाद् ब्रह्मापि विना विघ्नं हरिं प्रभुम् ॥२०

पूजयामास यज्ञेन वक्ष्येऽथो खड्गलक्षणम् ।
खटीखट्टर जाता ये दर्शनीयास्तु ते स्मृताः ॥२१

+ × ×

APPENDIX
SOME GRAPHICAL PURĀṆIC TEXTS ON SARASVATĪ

१. मत्स्यपुराणम्

अध्याय ३

लोकसृष्टचर्थं हृदि कृत्वा समस्थितः ।
ततः संजपतस्तस्य भित्त्वा देहमकल्मषम् ।।३०

स्त्रीरूपमवर्धमकरोदर्धं पुरुषरूपवत् ।
शतरूपा च सा ख्याता सावित्री च निगद्यते ।।३१

सरस्वत्यथ गायत्री ब्रह्माणी च परंतप ।
ततः स्वदेहसंभूतामात्मजामित्यकल्पयत् ।।३२

दृष्ट्वा तां व्यथितस्तावत्कामबाणार्दितो विभुः ।
अहो रूपमहो रूपमिति चाऽऽह प्रजापतिः ।।३३

ततो वसिष्ठप्रमुखा भगिनिमिति चुक्रुशुः ।
ब्रह्मा न किञ्चिद्ददृशे तन्मुखालोकमाहृते ।।३४

अहो रूपमहो रूपमिति प्राह पुनः पुनः ।
ततः प्रणामनम्रां तां पुनरेवाभ्यलोकयत् ।।३५

अथ प्रदक्षिणां चक्रे सा पितुर्वरवर्णिनी ।
पुत्रेभ्यो लज्जितस्यास्य तद्रूपालोकनेच्छया ।।३६

आविर्भूतं ततो वक्त्रं दक्षिणं पाण्डुगण्डवत् ।
विस्मयस्फुरदोष्ठं च पाश्चात्यमुदगात्ततः ।।३७

चतुर्थमभवत्पश्चाद्वामं कामशरातुरम् ।
ततोऽन्यदभवत्तस्य कामातुरतया तथा ।।३८

उत्पान्त्यास्तदाकाश आलोकनकुतूहलात् ।
सृष्टचर्थं यत्कृतं तेन तपः परमदारुणम् ।।३९

तत्सर्वं नाशमगमत्स्वसुतोपगमेच्छया ।
तेनोर्ध्वं वक्त्रमभवत्पञ्चमं तस्य धीमतः ।
आविर्भवज्जटाभिश्च तद्वक्त्रं चाऽऽवृणोत्प्रभुः ।।४०

× × ×

उपयेमे स विश्वात्मा शतरूपामनिन्दिताम् ।
स बभूव तया सार्धमतिकामातुरो विभुः ॥
स लज्जां चकमे देवः कमलोदरमन्दिरे ॥४३
यावदब्दशतं दिव्यं यथाऽन्यः प्राकृतो जनः ।
ततः कालेन महता तस्याः पुत्रोऽभवत्मनुः ॥४४

अध्याय १२१

परस्परेण द्विगुणा धर्मतः कामतोऽर्थतः ।
हेमकूटस्य पृष्ठे तु सर्पाणां तत्सरः स्मृतम् ॥६४
सरस्वती प्रभवति तस्माज्ज्योतिष्मती तु या ।
अवगाढे ह्युभयतः समुद्रौ पूर्वपश्चिमौ ॥६५

अध्याय १८६

पुण्या कनखले गङ्गा कुरुक्षे सरस्वती ।
ग्रामे का यदि वाऽरण्ये पुण्या सर्वत्र नर्मदा ॥१०

अध्याय २६०

आज्यस्थालीं न्यसेत् पार्श्वे वेदांश्च चतुरः पुनः ।
वामपार्श्वेऽस्य सावित्रीं दक्षिणे च सरस्वतीम् ॥४४

अध्याय २६१

मातृणां लक्षणं वक्ष्ये यथावदनुपूर्वशः ।
ब्रह्माणी ब्रह्मसदृशी चतुर्वक्त्रा चतुर्भुजा ॥२४
हंसाधिरूढा कर्त्तव्या साक्षसूत्रकमण्डलुः ।
महेश्वरस्य रूपेण तथा माहेश्वरी मता ॥२५

२. वायुपुराणम्

अध्याय २३

प्रादुर्भूता महानादा विश्वरूपा सरस्वती ।
विश्वमाल्याम्बरधरं विश्वयज्ञोपवीतिनम् ॥३८

× × ×

आनन्दस्तु स विज्ञेय आनन्दत्वे महातपः ।
गालव्यगोत्रतपसा मम पुत्रस्त्वमागतः ।।५०

त्वयि योगश्च सांख्यं च विद्याविधिः क्रिया ।
ऋतं सत्यं च यद्ब्रह्म अहिंसा संततिक्रमाः ।।५१

ध्यानं ध्यानवपुः शान्तिर्विद्याऽविद्या मतिर्धृतिः ।
कान्तिः शान्तिः स्मृतिर्मेधा लज्जा शुद्धिः सरस्वती ।
तुष्टिः पुष्टिः क्रिया चैव लज्जा शान्तिः प्रतिष्ठिता ।।५२-५३

षड्विंशत्तद्गुणा ह्येषा द्वात्रिंशाक्षरसंज्ञिता ।
प्रकृतिं विद्धि तां ब्रह्मणस्त्वत्प्रसूतिं महेश्वरीम् ।।५४

सैषा भगवती देवी तत्प्रसूतिः स्वयंभुवः ।
चतुर्मुखी जगद्योनिः प्रकृतिर्गौः प्रकीर्तिता ।।५५

प्रधानं प्रकृतिं चैव यदाहुस्तत्त्वचिन्तकाः ।।५६

अजामेतां लोहितां शुक्लकृष्णां विश्वं संप्रसृजमानां सुरूपाम् ।
अजोऽहं वै बुद्धिमान्विश्वरूपां गायत्रीं गां विश्वरूपां हि बुद्ध्वा ।।५७

एवमुक्त्वा महादेवः अ (वस्त्व) ट्टहासमथाकरोत् ।
वलितास्फोटितरवं कहाकहनदं तथा ।।५८

× × ×

यस्माच्चतुष्पदा ह्येषा त्वया दृष्टा सरस्वती ।
तस्माच्च पशवः सर्वे भविष्यन्ति चतुष्पदाः ।।
तस्माच्चैषां भविष्यन्ति चत्वारो वै पयोधराः ।।८८

× × ×

जैगीषव्येति विख्यातः सर्वेषां योगिनां वरः ।
तत्रापि मम ते पुत्रा भविष्यन्ति युगे तदा ।।१३८

सारस्वतः सुमेधश्च वसुवाहः सुवाहनः ।
तेऽपि तेनैव मार्गेण ध्यानयुक्तिं समाश्रिताः ।।१३९

× × ×

परिवर्तेऽथ नवमे व्यासः सारस्वतो यदा ।
तदा चाहं भविष्यामि ऋषभो नाम नामतः ।।१४३

३. ब्रह्मवैवर्त्तपुराणम् (ब्र० ख०)

अध्याय ३

× × ×

आविर्बभूव कन्यैका धर्मस्य वामपार्श्वतः ।
मूर्तिर्मूर्तिमती साक्षाद्द्वितीया कमलालया ॥५३

आविर्बभूव तत्पश्चान्मुखतः परमात्मनः ।
एका देवी शुक्लवर्णा वीणापुस्तकधारिणी ॥५४

कोटिपूर्णेन्दुशोभाढ्या शरत्पङ्कजलोचना ।
वह्निशुद्धांशुकाधाना रत्नभूषणभूषिता ॥५५

सस्मिता सुदती श्यामा सुन्दरीणां च सुन्दरी ।
श्रेष्ठा श्रुतीनां शास्त्राणां विदुषां जननी परा ॥५६

वागधिष्ठातृदेवी सा कवीनामिष्टदेवता ।
शुद्धसत्त्वस्वरूपा च शान्तरूपा सरस्वती ॥५७

गोविन्दपुरतः स्थित्वा जगौ प्रथमतः सुखम् ।
तन्नामगुणकीर्त्ति च वीणया सा ननर्त च ॥५८

कृतानि यानि कर्माणि कल्पे कल्पे युगे युगे ।
तानि सर्वाणि हरिणा तुष्ठाव च पुष्पाञ्जलिः ॥५९

× × ×

अध्याय ४ (प्र० ख०)

× × ×

आदौ सरस्वतीपूजा श्रीकृष्णेन विनिर्मिता ।
यत्प्रसादान्मुनिश्रेष्ठ मूर्खो भवति पण्डितः ॥११

आविर्भूता यदा देवी वक्त्रतः कृष्णयोषितः ।
इयेष कृष्णं कामेन कामुकी कामरूपिणी ॥१२

स च विज्ञाय तद्भावं सर्वज्ञः सर्वमातरम् ।
तामुवाच हितं सत्यं परिणामसुखावहम् ॥१३

श्रीकृष्ण उवाच—

भज नारायणं साध्वि मदंशं च चतुर्भुजम् ।
युवानं सुन्दरं सर्वगुणयुक्तं च मत्समम् ॥१४

× + ×

कान्ते कान्तं च मां कृत्वा यदि स्थातुमिहेच्छसि ।
त्वत्तो बलवती राधा न ते भद्रं भविष्यति ॥१७

× × ×

अध्याय ६

लक्ष्मीः सरस्वती गङ्गा तिस्रो भार्या हरेरपि ।
प्रेम्णा समास्तास्तिष्ठन्ति सततं हरिसन्निधौ ॥१७

चकार सैकदा गङ्गा विष्णोर्मुखनिरीक्षणम् ।
सस्मिता च सकामा च सकटाक्षं पुनः पुनः ॥१८

विभुर्जहास तद्वक्त्रं निरीक्ष्य मुदा क्षणम् ।
क्षमां चकार तद्दृष्ट्वा लक्ष्मीर्नैव सरस्वती ॥१९

बोधयामास तां पद्मा सत्त्वरूपा च सस्मिता ।
क्रोधाविष्टा च सा वाणी न च शान्ता बभूव हि ॥२०

उवाच गङ्गाभर्तारं रक्तास्या रक्तलोचना ।
कम्पिता कोपवेगेन शश्वत्प्रस्फुरिताधरा ॥२१

सर्वत्र समताबुद्धिः सद्भर्तुः कामिनीः प्रति ।
धर्मिष्ठस्य वरिष्ठस्य विपरीता खलस्य च ॥२२

ज्ञातं सौभाग्यमधिकं गङ्गायां ते गदाधर ।
कमलायां च तत्तुलां न च किञ्चिन्मयि प्रभो ॥२३

गङ्गायाः पद्मया सार्धं प्रीतिश्चापि सुसंमता ।
क्षमां चकार तेनेदं विपरीतं हरिप्रिया ॥२४

किं जीवनेन मेऽत्रैव दुर्भगायाश्च साम्प्रतम् ।
निष्फलं जीवनं तस्या या पत्युः प्रेमान्वितम् ॥२५

× × ×

सरस्वतीवचः श्रुत्वा दृष्ट्वा तां कोपसंयुताम् ।
मनसा तु समालोच्य स जगाम बहिःसभाम् ॥२७

गते नारायणे गङ्गामवोचन्निर्भयं रुषा ।
वागधिष्ठातृदेवी सा वाक्यं श्रवणदुःखम् ॥२८

हे निर्लज्जे सकामे त्वं स्वामिगर्वं करोषि किम् ।
अधिकं स्वामिसौभाग्यं विज्ञापयितुमिच्छसि ॥२९

मानहानिं करिष्यामि तवाद्य हरिसन्निधौ ।
किं करिष्यति ते कान्तो मम वै कान्तवल्लभः ॥३०

इत्येवमुक्त्वा गङ्गाया जिघृक्षुं केशमुद्यताम् ।
वारयामास तां पद्मा मध्यदेशस्थिता सती ॥३१

शशाप वाणी तां पद्मां महाकोपवती सती ।
शशाप वाणी तां पद्मां महाकोपवती सती ।
वृक्षरूपा सरिद्रूपा भविष्यसि न संशयः ॥३२

विपरीतं यतो दृष्ट्वा किञ्चिन्नो वक्तुमर्हसि ।
सन्तिष्ठसि सभामध्ये यथा वृक्षे यथा सरित् ॥३३

शापं श्रुत्वा च सा देवी न शशाप चुकोप न ।
तत्रैव दुःखिता तस्थौ वाणीं धृत्वा करेण च ॥३४

अत्युद्धतां च तां दृष्ट्वा कोपप्रस्फुरितानना ।
उवाच गङ्गा तां देवीं पद्मां पद्मविलोचना ॥३५

गङ्गोवाच—

त्वमुत्सृज महोग्रां तां पद्मे किं मे करिष्यति ।
वाग्दुष्टा वागधिष्ठात्री देवीयं कलहप्रिया ॥३६

यावती योग्यताऽस्याश्च यावती शक्तिरेव वा ।
तथा करोतु वादं च मया सार्धं सुदुर्मुखा ॥३७

स्वबलं यन्मम बलं विज्ञापयितुमर्हतु ।
जानन्तु सर्वे ह्युभयोः प्रभावं विक्रमं सति ॥३८

इत्युक्त्वा सा देवी वाण्यै शापं ददाविति ।
सरित्स्वरूपा भवतु सा या त्वामशपद्रुषा ॥३९

अधोमर्त्यं सा प्रयातु सन्ति यत्रैव पापिनः ।
कलौ तेषां च पापांशं लभिष्यति न संशयः ॥४०

इत्येवं वचनं श्रुत्वा तां शशाप सरस्वती ।
त्वमेव यास्यसि महीं पापिपापं लभिष्यसि ॥४१

अध्याय ७

नारायण उवाच—

पुण्यक्षेत्रे ह्याजगाम भारते सा सरस्वती ।
गङ्गाशापेन कलया स्वयं तस्थौ हरेः पदम् ॥१

भारती भारतं गत्वा ब्राह्मी च ब्रह्मणः प्रिया ।
वागधिष्ठातृदेवी सा तेन वाणी च कीर्त्तिता ॥२

सर्वं विश्वं परिव्याप्य स्रोतस्येव हि दृश्यते ।
हरिः सरःसु तस्येयं तेन नाम्ना सरस्वती ॥३

सरस्वती नदी सा च तीर्थरूपातिपावनी ।
पापिपापेध्मदाहाय ज्वलदग्निस्वरूपिणी ॥४

× × ×

४. विष्णुपुराणम्

अध्याय १/७

× × ×

तेष्वेवं निरपेक्षेषु लोकसृष्टौ महात्मनः ।
ब्रह्मणोऽभून्महाक्रोधस्त्रैलोक्यदहनक्षमः ॥८

तस्य क्रोधात् समुद्भूतज्वालामालाविदीपितम् ।
ब्रह्मणोऽभूत् तदा सर्वं त्रैलोक्यमखिलं मुनी ॥९

भ्रूकुटीकुटिलात् तस्य ललाटात् क्रोधदीपितात् ।
समुत्पन्नास्तदा रुद्रो मध्याह्नार्कसमप्रभः ॥१०

अर्धनारीनरवपुः प्रचण्डोऽतिशरीरवान् ।
विभजात्मानमित्युक्त्वा तं ब्रह्मान्तर्दधे ततः ॥११

तथोक्तोऽसौ द्विधा स्त्रीत्वं पुरुषत्वं तथाकरोत् ।
विभेद पुरुषत्वञ्च दशधा चैकधा च सः ॥१२

सौम्यासौम्यैस्तथा शान्ताशान्तैः स्त्रीत्वञ्च स प्रभुः ।
बिभेद बहुधा देवः स्वरूपैरसितैः सितैः ॥१३

ततो ब्रह्मात्मसम्भूतं पूर्वं स्वायम्भुवं प्रभुः ।
आत्मानमेव कृतवान् प्रजापाल्ये मनुं द्विजम् ॥१४

× × ×

शतरूपाञ्च तां नारीं तपोनिर्धूतकल्मषाम् ।
स्वायम्भुवो मनुर्देवः पत्नीत्वे जगृहे विभुः ॥१६

× × ×

५. स्कन्दपुराणम्

अध्याय ६।४६

× × ×

तत्प्रभावं सरस्वत्याः स विज्ञाय महीपतिः ।
श्रद्धया परया युक्तो ध्यायमानः सरस्वतीम् ॥१६

× × ×

ततस्तूर्णं समादाय मृत्तिकां स नदीतटात् ।
चकार भारतीं देवीं स्वयमेव चतुर्भुजाम् ॥१७

दधतीं दक्षिणे हस्ते कमलं सुमनोहरम् ।
अक्षमालां तथान्यस्मिञ्जतारकं वर्चसम् ॥१८

कमण्डलुं तथान्यस्मिन्दिव्यवारिप्रपूरितम् ।
पुस्तकं च तथा वामे सर्वविद्यासमुद्भवम् ॥१९

अध्याय ७।३३

× × ×

ततः सरस्वतीं प्राह देवदेवो जनार्दनः ।
त्वमेव व्रज कल्याणि प्रतीच्यां लवणोदधौ ॥१३

एवं कृते सुराः सर्वे भविष्यन्ति भयोज्झिताः ।
अन्यथा वाडवेनैते दह्यते स्वेन तेजसा ॥१४

तस्मात्त्वं रक्ष विबुधाने तस्मात्तुमुलाद्भयात् ।
मातेव भव सुश्रोणि सुराणामभयप्रदा ॥१५

× × ×

ततो विसृज्य तां देवीं नदी भूत्वा सरस्वती ॥४०

हिमवतं गिरिं प्राप्य प्लक्षात्तत्र विनिर्गता ।
अवतीर्णा धरापृष्ठे मत्स्यकच्छपसङ्कुला ॥४१

६. ब्रह्मपुराणम्

अध्याय २।१४

× × ×

तैर्विमिश्रा जनपदा आर्या म्लेच्छाश्च भागशः ।
पीयन्ते यैरिमा नद्यो गङ्गा सिन्धुः सरस्वती ॥२४

शतद्रुश्चन्द्रभागाश्च यमुना सरयुस्तथा ।
इरावती वितस्ता च विपाशा देविका कुहूः ॥२५

गोमती धूतपापा च बुद्बुदा च दृषद्वती ।
कौशिकी त्रिदिवा चैव निष्ठिवी गण्डकी तथा ॥२६

चक्षुर्लोहित इत्येता हिमवत्पादनिस्सृताः ।
वेदस्मृतिवेदवती वृत्रघ्नी सिन्धुरेव च ॥२७

अध्याय ४।४

× × ×

सविता मृत्यवे प्राह मृत्युश्चेन्द्राय वै पुनः ।
इन्द्रश्चापि वसिष्ठाय सोऽपि सारस्वताय च ॥६०
सारस्वतस्त्रिधाम्नेऽथ त्रिधामा च शरद्वते ।
शरद्वांस्तु त्रिविष्टाय सोऽन्तरिक्षाय दत्तवान् ॥६१

७. पद्मपुराणम् (खण्ड ५)

अध्याय ५/२७

× × ×

त्वं सिद्धिस्त्वं स्वधा स्वाहा त्वं पवित्रं मतं महत् ।
सन्ध्या रात्रिः प्रभा भूतिर्मेधा श्रद्धा सरस्वती ॥११७
यज्ञविद्या महाविद्या गुह्यविद्या च शोभना ।
आन्विक्षिकी त्रयीविद्या दण्डनीतिश्च कथ्यते ॥११८

८. गरुडपुराणम्

अध्याय १/७

× × ×

आसनादीन् हरेरेतैर्मन्त्रैर्दद्याद् वृषध्वज ।
विष्णुशक्त्याः सरस्वत्याः पूजां शृणु शुभप्रदाम् ॥७

ओं ह्रीं सरस्वत्यै नमः ओं ह्रां हृदयाय नमः ओं ह्रीं शिरशे नमः ओं ह्रूं शिखायै ओं ह्रैं कवचाय नमः ओं ह्रौम् ।

नेत्रत्रयाय नमः ओं ह्रः अस्त्राय नमः ॥८
श्रद्धा ऋद्धिः कला मेधा तुष्टिः पुष्टिः प्रभा मतिः ।
ओंकाराद्या नमोऽन्ताश्च सरस्वत्याश्च शक्तयः ९॥

ओं क्षेत्रपालाय नमः ओं गुरुभ्यो नमः ।
ओं परमगुरुभ्यो नमः ॥१०

पद्मस्थायाः सरस्वत्या आसनाद्यं प्रकल्पयेत् ।
सूर्य्यादीनां स्वकैर्मन्त्रैः पवित्रारोहणन्तथा ॥११

९. देवीभागवतपुराणम्

अध्याय ५/१९

चन्द्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणी पयस्विनी शर्करावती तुङ्गभद्रा कृष्णा वेण्या भैरथी गोदावरी निर्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती सिन्धुरन्धः शोणश्च नदौ महानदी वेदस्मृतिर्ऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयू रोधस्वती सप्तवती सुषोमा शतद्रुश्चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः ॥१८
भाग० पु० ५।१९।१८

अध्याय ३।१२

× × ×

वाचं दुहितरं तन्वीं स्वयंभूर्हरन्तीं मनः ।
अकामां चकमे क्षत्तः सकाम इति न श्रुतम् ॥२८

१०. वामनपुराणम्

अध्याय ३२

× × ×

त्वं देवि सर्वलोकानां माता देवारणिः शुभा ।
सदसद्देवि यत्किञ्चिन्मोक्षबोधाय यत्पदम् ॥६

यथा जलं सागरे हि तथा तत्त्वयि संस्थितम् ।
अक्षरं परमं ब्रह्म विश्वं चैतत्क्षरात्मकम् ॥७

दारुण्यवस्थितो वह्निर्भूमौ गन्धो यथा श्रुतम् ।
तथा त्वयि स्थितं ब्रह्म जगच्चेदमशेषतः ॥८

ॐकाराक्षरसंस्थानं यत्र देवि स्थिरास्थिरम् ।
तत्र मात्रात्रयं सर्वमस्ति यद्देवि नास्ति च ॥९

त्रयो लोकास्त्रयो वेदास्त्रैविद्यं पावकत्रयम् ।
त्रीणि ज्योतींषि वर्गाश्च त्रयो धर्मादयस्तथा ॥१०

त्रयो गुणास्त्रयो वर्णास्त्रयो देवास्तथा क्रमात् ।
त्रिधातवस्तथाऽवस्थाः पितरश्चाग्निमादयः ॥११

एतन्मात्रात्रयं देवि तव रूपं सरस्वति ।
विभिन्नदर्शना आद्या ब्रह्मणो हि सनातनाः ॥१२

अध्याय ४०

× × ×

वनान्येतानि वै सप्त नदीः शृणुत मे द्विजाः ।
सरस्वती नदी पुण्या तथा वैतरिणी नदी ॥६

आपगा च महापुण्या गङ्गा मन्दाकिनी नदी ।
मधुस्रवा अम्लुनदी कौशिकी पापनाशिकी ॥७

दृषद्वती महापुण्या तथा हिरण्वती नदी ।
वर्षाकालवहाः सर्वा वर्जयित्वा सरस्वतीम् ॥८

अध्याय ४०

× × ×

पुष्टिर्धृतिस्तथा कीर्त्तिः सिद्धिः कान्तिः क्षमा तथा ।
स्वधा स्वाहा तथा वाणी तवायत्तमिदं जगत् ॥१५

त्वमेव सर्वभूतेषु वाणीरूपेण संस्थिता ।
एवं सरस्वती तेन स्तुता भगवती तदा ॥१६

११. मार्कण्डेयपुराणम्

अध्याय ५६

× × ×

गौरीदेहात् समुद्भूता या सत्त्वैकगुणाश्रया ।
साक्षात्सरस्वती प्रोक्ता शुम्भासुरनिर्बर्हिणी ॥१४

दधौ चाष्टभुजाबाणमुसले शूलचक्रभृत् ।
शङ्खं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप ॥१५

एषा सम्पूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति ।
निशुम्भमथिनी देवी शुम्भासुरनिर्बर्हिणी ॥१६

ILLUSTRATIONS OF PLATES

BRAHMĀ

Plate I. A four-faced image of Brahmā is preserved in the Prince of Wales Museum, Bombay. It dates back to the 6th century A.D. It belongs to Elephanta in Mahārāṣṭrā. Brahmā as such has no hands, but his heads have beautiful *Jaṭāmukutas*. He wears a beautiful necklace, *Yajñopavīta* and *Mekhalā*. He also has no legs.

Brahmā
Elephanta, 6th Century A.D.,
Prince of Wales Museum, Bombay.

Plate II. At Aihole, Distt. Bijapur, there is an image of Brahmā, who is seated on a lotus-seat. He has four faces with usual *Jaṭāmukuṭas*. He has four hands with a staff, a rosary, a jar and the fourth empty in the *Varada Mudrā*. The god wears a beautiful necklace, a sacred thread and wristlets. His *Vāhana*, *i.e.* the swan is on the right side. Several Ṛṣis, in standing postures are shown as worshipping the god.

Brahmā
Early Western Chalukya, 6th-7th Century A.D.,
Aihole, Karnataka,
Prince of Wales Museum, Bombay.

Plate III. The Prince of Wales Museum has a life-size image of Brahmā, which belongs to the early Western Chalukyan period. It is roughly of 7th-8th century A.D. Its height is 102 cm. In the image form, Brahmā is in standing pose. He has four heads and four hands with usual *Hetus*. The god wears *Jaṭāmukutas*, necklace, sacred thread, *Mekhalā* and other ornaments. Thus, the god is profusely ornamented. Four female images are to the right and left and they seem to be at the service of the god.

Brahmā
Early Western Chalukya, 7th-8th Century A.D.,
Prince of Wales Museum, Bombay.

Plate IV. In the *Purāṇas* and popular belief, Brahmā is called *Caturmukha*. There is an image of Brahmā's faces only, which belongs to Madhya Pradesh and dates back to 8th century A.D. Its height is 31 cm. It is made of granite. The head is with usual *Jaṭāmukuṭa* and earnings.

Brahmā
Madhya Pradesh, 8th Century A.D.,
Prince of Wales Museum, Bombay.

Plate V. A seated image of Brahmā on stone belonging to Madhya Pradesh is lying in the Prince of Wales Museum, Bombay. It dates back to the 10th century A.D. Its height is 22 cm. The image makes us believe that the god is practising penance and is at a secluded place. Brahmā as such has four faces and bears a small beard. He has two hands. One hand is partly damaged and the other has something, which is not clear. The image presents an austere atmosphere.

Brahmā
Madhya Pradesh, 10th Century A.D.,
Prince of Wales Museum, Bombay.

Plate VI. A seated image of Brahmā with Brahmāṇī belongs to Medieval period—12th cenury A.D. Its height is 45 cm and the length is 25·5 cm. Here, Brahmā implicitly has two hands—one hand holds his spouse in his lap. The god has four faces with usual *Jatāmukuṭas* on the heads. He wears usual ornaments, too.

Brahmā
Medieval period, 12th Century A.D.,
Prince of Wales Museum, Bombay.

Plate VII. At Ambernath, there is a Śiva temple, which has the image of Brahmā with Brahmāṇī on his lap. The image is somewhat vague. However, Brahmā is in sitting posture. He has four hands with usual *Hetus* and has four faces.

Brahmā
With Brahmāṇī,
Ambernath, Rajasthan.

Plate VIII. Brahmā is a popular deity not only in India, but abroad. This is borne out by a fact that an image of the god is installed in the premises of the *Airāvaṇa* Hotel in Bangkok, Thailand. It is most celebrated image of Brahmā in Thailand. People of various faiths and adherent to different religions, passing through that way, generally bow their heads in the honour of the god. It is a four-faced image of the Brahmā and is in seated posture. Brahmā holds a staff in one of his hands. He wears *Jaṭāmukuṭas*, a necklace and other ornaments. In Thailand, there is another temple, which is called the Mariyamman, which, too, has got an image of Brahmā. But it is not so famous as that of *Airāvaṇa* Hotel.

Brahmā
20th Century A.D.,
Airāvaṇa Hotel, Bangkok,
Thailand.

ILLUSTRATIONS OF PLATES

SARASVATĪ

Plate I. Image of seated Sarasvatī holding a rosary and a manuscript in her upper hands and playing on the Vīṇā held in her lower hands. The image discovered from Suhania belongs to the Gurjara-Pratihāra period, 9th Century A.D.

Sarasvatī
Gurjara-Pratihāra, 9th Century A.D.,
The Central Archaeological Museum,
Gwalior.

Plate II. Image of Sarasvatī seated in *Lalitāsana* on a lotus. She holds a rosary and a manuscrip (partly broken) in upper hands, the lower right hand is in the *Varada Mudrā*, while the corresponding left probably carries a *Kamaṇḍalu.* She wears a Jaṭāmukuṭa and other ornaments.

Sarasvatī
Paramāra, 11th Century A.D.,
National Museum,
New Delhi.

Plate III. Image of Sarasvatī standing in the *Tribhaṅga* pose on a full-blown lotus. She holds clock-wise a rosary, a lotus, a palm-leaf manuscript and a spouted Kamaṇḍalu, symbolising the vase of full knowledge. The figure carved in white marble is shown wearing an elaborate headdress and various ornaments. She is flanked by two female figures carrying *Vīṇās* in their hands. The donor and his wife with hands held in adoration are shown near the feet of the goddess.

Sarasvatī
Cauhāna, 12th Century A.D.,
Pallu, Bikaner, Rajasthan,
National Museum,
New Delhi.

Plate IV. Anothor image of Sarasvatī discovered along wtih above icon is now exhibited in Bikaner Museum. The image has an

exquisitely carved *Prabhātoraṇa* depicting various Jain divinities.

Sarasvatī
Cauhāna, 12th Century A.D.,
Pallu, Bikaner, Rajasthan,
Gaṇgā Golden Jubilee Museum,
Bikaner.

Plate V. Image of Sarasvatī seated on a double-lotus-seat. She holds a rosary and a book in her upper hands, while her lower hands carry a Vīṇā. Her hair is beautifully arranged in Dhammilla-fashion and she wears typical ornaments. An interesting feature in this image is that a ram is depicted as her mount and not a swan as is generally found in the contemporary images of the goddess from other parts of Northern India.

Sarasvatī
Pāla, 10th Century A.D.,
Gaya, Bihar,
National Museum,
New Delhi.

Plate VI. Image of Sarasvatī dancing with her right foot placed on the ground and the left raised and bent at knee. The multi-armed goddess, shown under a mango tree, carries a rosary, a goad, a book, and a Vīṇā in her hands. She is profusely ornamented.

Sarasvatī
Hoyṣala, 12th Century A.D.,
Keśava Temple, Somanathpur,
Karnataka.

Plate VII. Sarasvatī in dancing-pose has found a more beautiful iconographical depiction in Karnataka than in other parts of the country. In North, probably, the only example of this form of the goddess is found on the Horsaleśvara Temple at Udaypur (Madhya Pradesh, Paramāra, 11th Century A.D.), where she is represented with Naṭarāja and dancing Pārvatī. The image of dancing Sarasvatī holds a rosary, goad, lotus, noose, book and *Vīṇā* in her hands. She wears a high

be-jewelled crown and is bedecked in ornaments of the period. She is attended by a female caurī-bearer on either side and her *Vāhana*, the swan, is depicted near her right foot. This image has been regarded as one of the master-pieces of Hoyṣāla art.

Sarasvatī
Hoyṣāla, 12th Century A.D.,
Horṣaleśvara Temple, Helebid,
Karnataka.

Plate VIII. A magnificently carved figure of the goddess of learning and fine arts is shown seated on a double-lotus. The four-armed deity wearing a high *Jaṭāmukuṭa*, a crescent-shaped necklace, sacred thread and *Dhotī* with schematic folds is held with a girde (*Mekhalā*).

Sarasvatī
Chola-Vijayanagar,
13th-14th Century A.D.,
Tamil Nadu.

PHOTO PLATES



BRAHMĀ


Plate I :



Brahmā


Elephanta, 6th Century A.D.,
Mahārāṣṭra,
Prince of Wales Museum,
Bombay.

Plate II :



Brahmā
Early Western Chalukya, 6th-7th Century A.D., Aihole, Karnataka, Prince of Wales Museum, Bombay.

Plate III :



Brahmā
Early Western Chalukya, 7th-8th Century A.D.,
Karnataka,
Prince of Wales Museum,
Bombay.

Plate IV :



Brahmā
Madhya Pradesh, 8th Century A.D.,
Prince of Wales Museum,
Bombay.

Plate V :



Brahmā
Madhya Pradesh, 10th Century A.D.,
Prince of Wales Museum,
Bombay.

Plate VI :



Brahmā
Medieval, 12th Century A.D.,
Prince of Wales Museum,
Bombay.

Plate VII :



Brahmā
with Brahmāṇī,
Ambernath, Rajasthan,

Plate VIII :



Brahmā, 20th Century A.D., Airāvaṇa Hotel, Bangkok, Thailand.

PHOTO PLATES

Sarasvatī

Plate I:




Sarasvatī, Gurjara-Pratihāra, 9th Century A.D., The Central Archaeological Museum, Gwalior.

Plate II :




Sarasvatī
Paramāra, 11th Century A.D.,
National Museum,
New Delhi.

Plate III :




Sarasvatī
Cauhāna, 12th Century A.D.,
Pallu, Bikaner, Rajasthan,
National Museum,
New Delhi.

Plate IV :




Sarasvatī
Cauhāna, 12th Century A.D.,
Pallu, Bikaner, Rajasthan,
Gaṅgā Golden Jubilee Museum,
Bikaner.

Plate V :




Sarasvatī
Pāla, 10th Century A.D.,
Gayā, Bihar,
National Museum,
New Delhi,

Plate VI :



Sarasvatī
Hoysala, 12th Century A.D.,
Keśava Temple, Somanathpur,
Karnataka.

Plate VII :



Sarasvatī
Hoyṣala, 12th Century A.D.,
Horśaleśvara Temple, Helebid,
Karnaṭaka.

Plate VIII :



Sarasvatī
Chola, Vijayanagar,
13th-14th Century A.D.,
Tamil Nadu.

OPINIONS

"SOME GRAPHICAL PURĀṆIC TEXTS ON BRAHMĀ is a collection of the *Purāṇic* Texts on Brahmā from important Purāṇas. It is a fine collection to understand the Purāṇic Brahmā........."

Dr. Suryakanta
Formerly Prof. of Sanskrit, B.H.U.

"This book forms a supplement of the research work on Brahmā by Dr. Mohammad Israil Khan. Here, we have a body of relevant texts from the various *Purāṇas* related to Brahmā. We are quite familiar with the *Adhyātmarāmāyaṇa*, which is actually a part of some *Purāṇa* relating to Rāma. This collection, too may become interesting on account of its being an exclusive account of Brahmā."

Dr. Madhusudan Mishra
Deputy Director, Rashtriya Sanskrit Sansthan,
(Union Ministry of Education, N. Delhi).

"The work, being a collection of the original texts from the *Purāṇas* related to Brahmā, forms a supplementary to Dr. Mohammad Israil Khan's book—BRAHMĀ IN THE PURĀṆAS. It is a valuable source-book for the scholars working on Brahmā and the related Gods and Goddesses. The collection depicts Dr. Khan's arduous labour in the study of the original *Purāṇas*. Many plates of the images of Brahmā and Sarasvatī, enhance the value of the work to a great extent. The work deserves all praise. I congratulate Dr. Khan on its publication."

Dr. M. C. Bharatiya
Reader & Head, Dept. of Sanskrit,
M.M.H. College, Ghaziabad,
(Meerut University, India).

CRESCENT PUBLISHING HOUSE
F/D-56, New Kavinagar,
Ghaziabad, U.P. (INDIA).